वप्रपंचयितुमाह॥ नवभिः श्लोकैः॥ इदमिति सुंदरं अभिनवं वस्तु परममिति। परमं त्यागं व्युत्पतेनेनेति त्यागो वैराग्यमित्यर्थः॥ ॥ ।

नि॰ष्टा॰ ६
२०
20

प्रशांतेति॥ तत्रवालनंनामवर्त्तमानेष्टवस्तुदर्शनकौतूहलांरम्पहृष्टौवालनंपरिकीर्त्तितमिति। शोकोनष्टेष्टवस्तुविषयेसमी
हितंभविष्यदिष्टवस्तुवांछितं। आशेति आशापाश आशायाःचिन्नहृन्नेरंतः संस्पर्शयन्त्रददामिसमाहितत्वात॥ तेनजीवामि आ

प्रशान्तवापल्लंवीतशोकमस्तसमीहितं॥ मनोममसुनेशान्तंतेनजीवाम्यनामयः॥ अयंवंधुष्यरश्चायंममायमथमन्यतः ३
तिब्रह्मन्नजानामितेनास्मिचिरंजीवितः॥ आशापाशचित्तत्रायाश्चिन्नहृन्नेसमाहितः॥ संस्पर्शनददाम्यन्तस्तेनजीवाम्यनामय
ःसुखितोस्मिसुखापन्नेदुःखितेजने॥ सर्वस्यप्रियमित्रंचतेनजीवाम्यनामया। आपद्यचलविन्नोस्मिजगन्मित्रंचसंपदि। भावाभे
वेषुनैवास्मितेनजीवाम्यनामयः एतत्तेकथितंब्रह्मन्यथास्मिचिरंजीवितः॥ त्वदाज्ञामात्रसिध्यर्थंधार्ष्ट्येनज्ञानपारगाः॥ वसिष्ट
उवाच॥ अहोसुचित्रंभवताकथितंमेषणांश्रुते॥ अत्मोदंतष्प्रकथितंष्यरंविस्मयकारणं॥ तदस्तुतवकल्याणंप्रविशात्मगृहा
श्रुभं॥ मध्याह्नसमयोयंमेव्रजामिसुरमंदिरं॥ ॥

राम
२०

पद्मापत्राम्मिसमयेअचलवधीरोस्मि। संपत्यासौजगतःसर्वस्यमित्रंचसर्वदाजगतःसर्वस्योपकरणान्भावभावेषुनैवास्मिएतेवभावद्वपार
ति। पदार्थगतंभेदंनीजसंदधामीतार्थः॥

अन्विति॥ अनुकम्पाकदर्थेत अनुकम्पनाक्लेशेन अलमनुकम्पां मा कुर्वीत्यर्थः॥ इतीति। यद्युक्तं तत्समाचर इत्युक्तिव्याख्याने भुशुण्डवचनांते

अनुकम्पाकदर्थेन तस्वर्गेंद्रालमिति त्रुवश॥ विष्टरादहमुत्थायनभः खगवदाप्लुतः। घोरित्रियोजनमात्रेऽहमदृश्यरूपयोगतः॥ म
यानिवारितः छायाउडस्मान्ग्यासंगतिः सतां। पातेकृतयुगस्यादौ पुनस्तेनास्मि संगतः। संगतोऽहं भुशुण्डेन मेरोः शृंगकुमेभवं॥
अथरामकृतेक्षीणे त्रेतासंघतिवर्त्तति॥ मध्येत्रेतायुगस्यास्यजातस्त्वं रिपुसूदनः। पुनरप्यष्टमे वर्षेतत्रैवोपरिमस्तकः॥ मिलि
तो भुशुण्डोऽस्मि तथैवाजरत्वपवाश॥ ॥इतिस्तंकथितं चित्रं भुशुण्डोदन्तमुत्तमं। श्रुत्वाविचार्य यैवान्नर्यद्युक्तं तत्समाचर॥ ॥
इतिनिर्वाणप्रकरणे भुशुण्डोपाख्यानंनामैकोनत्रिंशतिसर्गः॥ ॥

पायद्युक्तं तथाप्रतीयते तत्समाचरेत्यर्थः॥ ॥इति निर्वाणप्रकरणे भुशुण्डोपाख्यानंनाम एकोनत्रिंशोध्यायः॥ ॥ छ ॥

पूर्वं प्राणवृत्त्यनुसंधानात् चित्तविश्रांत्या निर्वाणमुक्तं ॥ इदानीं तद्वदेव देवपूजयापि चित्तविश्रान्तिलक्षणं निर्वाणं भवतीत्युच्यते ॥ त
तावद्देहाभिमानस्य सर्वनिर्वाणोपायप्रतिबंधकत्वात् ॥ तन्निवृत्त्यर्थं हितं किंचिदुपदिशति ॥ आभासमात्रमिति ॥ इदं शरीरं वस्तुतः आभा
समात्रं घटीतिमात्रसिद्धमपि संप्रति अविचारदशायां मिथ्या अयमित्यहमिति वात्मनो भेदेन त्वाभिमानाविषयतया तरांतःकरणे भा

वशिष्ठ उवाच ॥ आभासमात्रमेवेदमित्थं संप्रतिभासते अयत्नामाहमित्यत्र सदेव शरीरकं ॥ मांसास्थिमयनिर्म्माण
देहोहमिति विभ्रमं ॥ त्यज संकल्पनिर्म्माणं देहाः सन्ति सहस्रशः ॥ सुखतल्पं गतो येन स्वप्नदेहेन दिक्कृतात् ॥ परिभ्रमसि हे राम
स देहस्ते क्व संस्थितः ॥ ॥

सतेविचार्यमाणं पुनरसदेव मिथ्यैव कल्पितत्वात् ॥ मांसेति ॥ मांसास्थिमयं निर्म्माणं यस्य तादृशो देहोहमिति यो विभ्रमः तं त्यज ॥
एवंविधानां संकल्पकल्पितानां संदेहाः तेषामसत्यत्वं त्वया सहस्रशो विद्यमानत्वादित्यर्थः ॥ देहासत्यत्वमेवाह ॥ सुखेति ॥ सु
खतल्पगतस्य ते दिक्कृतः अत्र महेतवायेस्वप्रदेहाः तेषामसत्यत्वं त्वयाभ्युपगममेवेत्यर्थः ॥ ॥

जागरायामिति। जाग्रद्दशायामपि मनोरथपथेन […]णः। चिन्मयदेहविस्मरणात् पर्यवसितं यत्पार्थिवपं तन्मनोराज्यं न तत्रापि मिथ्यां देहे
नैव देशान्तरभ्रमणमित्यर्थः॥ दीर्घेति दीर्घं वा चित्तविभ्रमं मनीलिं न भद्र इतिवत् चिरकालानुवृत्तभ्रान्तिं। आभासमात्रमिति। जगत्त्रयं सं
ज्ञाबाध्यत्वात्। असंतन प्रतीयमानत्वात्। अतः आभासमात्रं प्रतिभासमात्रमेव न वास्तवमित्यन्यकलनात्यागमेव सम्यगालोकन

जागरायां मनोराज्ये येन स्वर्गपुरान्तरं। परिभ्रमसि मे तुंवास्मदेहस्त्वेकसंस्थितः॥ दीर्घस्वप्नमिमं विद्धि दीर्घं वा चित्तविभ्रमं॥
दीर्घं वापि मनोराज्यं संसारं रघुनंदन॥ आभासमात्रमेवेदं न सन्नासज्जगत्त्रयं॥ इत्यन्यकलनात्यागात्सम्यगा
लोकनं विदुः॥ अवश्यमेव हि मया मर्तव्यमिति निश्चयः॥ इत्यात्ममरणप्राप्तौ किं मुधा परितप्यते॥ अवश्य
मेव ज्ञातेन किं चिन्तु विभवादिकं। प्राप्तव्यं पुरुषेणेति लाभेष्वर्थस्य को मदः॥ अविभागं परित्यज्य पदार्थपट
लव्रजे॥ आभासमात्रं सामान्यमिदमालोकयानघ॥

विदुः॥ अवश्यमिति। मरणस्य जननेनैव आवश्यकत्वनिश्चयात् तत्प्राप्तौ परितापो व्यर्थ इत्यर्थः॥ अवश्यमिति। ज्ञातेन जीवता
पुरुषेणासु विभवादिकं किंचिच्छ्रेयः प्राप्तव्यमिति। मुनिश्चयादर्थलाभेषु मदोऽपि नोचित इत्यर्थः॥ अविभागमिति। पदार्थपटलव्र
जे पदार्थानां विषमसमुदायात्मके प्रपंचे अविभागं भेदबुद्धिं परित्यज्य इदमाभासमात्रमेव सामान्यं सर्वानुवृत्तं सच्चिन्मात्रमेवालोकय
अनुसंदध्व॥

नि॰प्र॰ २२ 22

आभासेति। एतत्कारणादाभासमात्रमपि विज्ञानमर्शकलंकितं चित्तसंबंधदूषितं न तत्कारणादपि आभासमात्रमपि सेत्स्यत्। निराभासो भ
व। निर्विकल्पो भव॥ रागइति॥ रागद्वेषाख्यौ द्वौ सर्पौ मनो विलेन विलीनौ न तावच्छितौ किंतु॥ निर्गतौ स एव कल्पतरुः॥ सर्वपुरुषा
र्थसाधकत्वात्॥ तस्माद्रागादिरहितात् पुंसः सकाशाल्लोके किं नाम श्रेयो न लभ्यते सर्वमपि श्रेयो लभ्यत इत्यर्थः॥ यइति॥ येपुन

आभासमात्रमप्यखिलं च ज्ञानमर्षकलंकितं॥ ततस्तदपि संत्यज्य निराभासो भवोत्तम॥ रागो द्वेषश्च सर्पौ द्वौ निविलीनौ म
नो विले यस्य कल्पतरोस्तस्मात्किं नाम न लभ्यते॥ ये प्राज्ञा गर्वमापन्ना विदग्धाः शास्त्रशालिनः॥ रागद्वेष
मयास्ताभ्यां गर्हिभास्तो धिगस्तु तान्॥ इदं संसारचक्रं हि नाभौ संकल्पमात्रके॥ संरोधितायां वहनाद्रघुनंदन रुध्यते

ः शास्त्रशालिनो विदग्धाः लौकिकवैदिकव्यवहारनिपुणा अपि प्रज्ञा गर्वप्रस्तावंतो वयमेवेत्यहंकारमापन्नाः संतो रागद्वेषम
याः रागद्वेषभूयिष्ठा भवंति॥ ते मान्य गर्हिताः दूरभारवहनक्रमत्वात्॥ वक्रम्ल्पापे गर्हिभाः तत्तुल्याः तान् धिगस्तु ते न प्रसष्टव्या राम २२
इत्यर्थः॥ इदमिति॥ संसारो जननमरणादिप्रवाहः॥ [illegible] चक्रे भ्रमणशीलत्वात्॥ तस्य संकल्पात्मकं चित्तमेव नाभिः प्रवर्तकत्वा
त्॥ आत [illegible] संसारो निरुध्यते॥

क्षोभितायामिति मनसि क्षोभिते संसारः प्रवहत्येव न तु प्रकारांतरेणारोद्धुं शक्यते। प्रज्ञेति प्रज्ञा प्रतिभा सौजन्यं शमादिसंपत् शास्त्रं
अध्यात्मविद्या। पौरुषं पुरुषस्य कर्म॥ भयेति मनोविकारे परित्यक्ते स्वरूपमेवावशिष्यत इत्यर्थः॥ चित्तेति मनःपिशाचपरवशस्य के

क्षोभितायां मनो नाम्यामिदं संसारचक्रकं। प्रयत्नाद्रोधितमपि प्रवहत्येव वेगतः॥ परं पौरुषमाश्रित्य बलं प्रज्ञां च युक्तितः। ना
भिसंसारचक्रस्य चित्तमेव निरोधयेत्॥ प्रज्ञासौजन्ययुक्तेन शास्त्रसंवलितेन च। पौरुषेणानयत्नाप्तं न तत्क्वचन लभ्यते॥ भ
यप्रदमकल्याणं धैर्यसर्वस्वहारिणं। संशान्तचित्तमनघ्मिशाच मुक्त्वाप्ययोसोमोसि स्थिरो भव॥ चित्तयक्षहताक्रान्तं न शा
स्त्राणि न बांधवाः॥ शक्नुवन्ति परित्रातुं गुरवो न च मानवं। मां शान्तिचित्तवेतालं गुरुशास्त्रार्थबांधवाः शक्नुवंति समुद्धर्तुं
स्वल्पां कान्मृगं यथा॥ भोगाभोगा वहिः कार्या आर्यस्याखसरे त्यदं प्रविचार्य महार्थस्वमात्मानमेकमाश्रयेत्॥ अत्र ते मामप
रां दृष्टिं महामोहविनाशिनीं। मा शृणु यात्कथिता पूर्वं मम कैलासकंदरे॥ संसाराडंबरशान्त्यर्थं देवेनार्धेन्दुमौलिना॥ ॥

नापि परित्रातुं न शक्यत इत्यर्थः। भोगेति। भोगा विषयविस्ताराः आर्यस्य जीवन्मुक्तस्य महार्थं परमार्थं सिद्धमात्मानमेकमाश्रयेत्
आहार्यत्वमिति पाठे स्वात्मन एव महार्यत्वं च विचार्य तमेवात्मानमाश्रयेदित्यर्थः॥ अत्रेति॥ अपरां दृष्टिं अन्यं आत्मज्ञानोपायं॥ ॥

नि॰ र्ना॰ ६ २३ अस्तीति॥ दिवः स्वर्गादपि परमउत्कृष्टः॥ कदाचिदिति श्लोकद्वयं वाक्यं॥ स्फूतपुटिकः पुटिका इत्या पुष्पानिक्षेपयोग्या॥ पुलिकाश्रा

२३

अस्तीड्क्करसंभारभासुरः परमोदिवः॥ कैलाशो नाना। शैलेन्द्रो गौरीरमणां मंदिरं॥ तत्रास्ते भगवान्देवो हरश्चंद्रकलाधरः॥ तं पूजयन्महादेवं तस्मिन्नेव गिरौ पुरा॥ कदाचिद्देवसंगंगातटे विरचिताश्रमः॥ तपोर्थतापसाचारे विरायरचितस्थितिः॥ सिद्धसंघातवलितः कृतशास्त्रार्थसंग्रहः॥ पुष्पार्थस्फूतपुटिकः पुस्तकग्रहसंग्रही॥ एवं गुणविशिष्टस्य कैलाशवनकुंजके॥ तपः प्रचरतो राममकालो त्यवर्त्तत॥ ॥ ॥

स्फूता प्रोता येन सतथा॥ पुस्तकग्रहसंग्रहा ज्ञानशास्त्रविषयाणां पुस्तकानां यः सम्ग्रहः तत्संग्रहशीलः॥ ॥ ॥ छ राम राम

राम २३

अथेति॥श्लोकचतुष्टयं वाक्यं॥कदाचित्तु वकुलस्य श्रावणमासपक्षस्यगते अतीते अष्टमे दिने रात्रेरग्रभागेऽर्द्धयामागते सति स एकोऽहं संव

अथैकः स कदाचित्तु वकुलस्याष्टमे दिने। गते श्रावणापक्षस्य रात्र्यग्रेऽर्द्धयंमागते। दिदृक्षुस्थान्तरूपा मुकाष्टमौन स्थि
ताश्चिच॥खडूष्टे ध्वांधकारेषु केजेषु गहनेषु च। एतस्मिन् समये तत्रया मार्थे प्रथमे गते॥समाधितनुतां नी
त्वा स्थितो हं वा ह्य मग्नहृत्कू। अपश्यं पकानने तेजो त्येवसमुत्थितं॥ शुभ्राभ्रशतशंकाशं चंच द्विंदुगणोपमं॥
प्रकटीकृतदिक्कुंजं तदालोक्य मया स्मयात्॥ आन्तःप्रकाशशालिन्या वुद्धि दृष्ट्या विलोकितं॥यावत्तावश्पामितं
सानुं प्राप्तं श्चंद्रकलाधरः॥गौरीकराप्पितकरो नंदिप्रोत्सारिताग्रजः॥ श्रीरामा॥ श्रीगहं स्तु भः॥

माधितमुतां नीत्वावाह्यमग्नहृत्कुक्षितः सन् कानने नृगीत्येवसमुत्थितं शुभ्राशतसंकाशं चंचद्विंदुगुणोपमं तेजोप
श्पामिइत्यन्वयः॥ कुटिलार्थेऽ गतीति शाकलायनःपपाठः॥ श्री॥श्रीगणेशायनमः॥

नि॰प्र शिपानिति ॥ शिष्यानुद्धोष्यासमावेश्युत्याप्पतस्य परमेश्वरस्य दृष्टिपूतं पुरोभागमग्रमंदारोति ॥ नानाविधौ स्तत्रनमस्काराणां च
२४ ष्टांगपंचांगादिनेदेनस्तोत्राणां चलौकिकवैदिकभेदेन भिन्नत्वान्नानाविधत्वं ॥ एतदिति ताहृशपेव याहृशी शिवस्य विहिता ताहृशै

शिष्यानुद्धोष्य तत्रस्थानगृहीतार्घ्यसुसंयतः ॥ आगमं सुमनास्तद्दृष्टिपूतमहं पुरः ॥ तत्र पुष्पांजलिं दत्वा हूरादेव त्रिलोचनः ॥
दत्वार्घ्येणामयादेवः मंघ्रणाम्प्राभिवंदितः ॥ ततः स्वंद्रप्रभासख्या रिज्या शीतलया तया ॥ हशा सद्यो निहारिणा चिरमसम्पा
स्पदीकृतः ॥ पुष्पासान्नूपविष्टाय तस्मै त्रैलोक्यसाक्षिणे ॥ अर्घ्यं पुष्पं तथा पाद्यमभ्युपेत्यार्पितं मया ॥ मंदारपुष्पांजलयो
विकीर्णा विहृद्वपुरः ॥ नानाविधैर्नमस्कारैः स्तोत्रैश्चाभ्यर्चितः शिवः ॥ ततो भगवती गौरी ताहृशेव मंदारपुष्पांजलयो विकी
र्णाविहृद्वपुरः ॥ नानाविधैर्नमस्कारैः स्तोत्रैश्चाभ्यर्चितः शिवः ॥ ततो भगवती गौरी ताहृशेव सपर्यया ॥ संपूजिता मसखी
युक्ता गणामंडलिकास्तया ॥ पूजां ते पूर्णशीतांशुरश्मिशीतलया गिरा ॥ तत्रोपविष्टं प्रोवाच मामहं इंदुकलाधरः ॥
ब्रह्मन्नत्र शमणालिन्यः प्राप्तविश्रान्तयः परे ॥ कश्चित्कल्पाणकारिण्यः संविदस्ते स्थिरास्पदे ॥ कश्चिन्न पस्ते निर्विघ्नं
कल्पोगणमनुवर्तते ॥ कश्चित्प्राणमनुप्राप्तं कश्चित्छाम्यन्तिती भीतयः ॥ एवंवादिनि देवेशे सर्वलोकैककारणे ॥ गिरा
नुनयशालिन्या मयोक्तं रघुनः ॥ त्वदनुस्मृतिकल्पाणवतामिह महेश्वर ॥ नच किंचन दुष्प्रापं न च काश्चन भी राम २४
वगणां मंडलिकाप्रथमसत्रहः ॥ ब्रह्मन्निति ॥ परेषदेप्राप्तविश्रांतयः ते मे संविदः स्थिराः क्वचित ॥ योगानेराया नमतिकचिदित्यर्थः ॥

त्वदीति॥ त्वदनुस्मरणजनितानंदेन परिपूरितं चेतसां त्वद्भक्तानां पुरः पुरोभागो येन प्रणमंति ते जगत्कोशेन संति। तद्इति देशः॥ अंग वंग कलिंगादयः जनपदा ग्रामाः त्वद्भक्तनिवासादेव देशादयः श्लाघ्या इत्यर्थः। फलइति॥ त्वदनुस्मरणाद्भूतस्य पुण्यस्य पुराकृत

त्वदनुस्मरणानंदपरिपूरितचेतसां ॥ न ते सन्ति जगत्कोशे प्रणामन्ति नयेपुरः ॥ ते देशास्ते जनपदास्तादिशस्ते च पर्वताः ॥ त्वदनुस्मरणे कान्त्वधियो यत्र स्थिता जनाः ॥ फलं भूतस्य पुण्यस्य वर्तमानस्य सेवनं ॥ तनोति चेष्यतो वीजं त्वदनुस्मरणं विभो ॥ ज्ञानामृतैककलशो भक्तिज्योत्स्ना निशाकरः ॥ अपवर्गपुरद्वारं त्वदनुस्मरणं प्रभो ॥ त्वदनुस्मरणोदारचिंतामणिमतामया ॥ सर्वासामापदां हर्त्री दत्तं भूतपते पदं ॥ इत्युक्तास्तु प्रसन्नात्मा भगवंतं महेश्वरं ॥ अवोचं प्रणतो भूत्वा यच्छामतं दिदं शृणु ॥ भगवंस्त्वत्प्रसादेन ज्ञातामेषा कलादिशः किंतु पृष्टुमिदे वेतस्संदेहं तत्त्वनिर्णयं ॥ ब्रूहि प्रसन्नया वाचा त्वत्कोद्वेगमनामयं ॥ सर्वपापक्षयकरं सर्वकल्याणवर्द्धनं ॥ देवार्चनविधानं तत्कीदृशं भवति प्रभो ॥ श्रीमहादेव उवाच ॥ शृणु ब्रह्मविदां श्रेष्ठ देवार्चनमनुत्तमं ॥ ॥

स्य पुराकृतस्य फलं अपुण्यस्यासंभवात्। वर्त्तमानस्य पुण्यस्य सेवनं तनोति। पुण्यसंवर्द्धयतीत्यर्थः॥ ईश्वरानुस्मरणेन पुण्यस्य साक्षुण्यात्॥ एष्यतो भविष्यतः पुण्यस्य वीजं ईश्वरस्य स्मरणात्स्ते च तस्मः पुण्यकारणोच्छायद्वत्तेः॥ ॥

शि॰ र्व॰ २५

25

नेति अर्द्धत्रयं वा क्वं। साकारस्य वस्तुनः परिछिन्नत्वात् तन्नस्वरत्वाद्वाकृत्रिमम नाद्यं तं वेदनं चिन्मात्रमेव देव शब्दार्थः॥ आकारेति॥

आकारादिभिः परिछिन्नेमिते वस्तुनि देवत्वेनाभ्युपगम्यमानत्वे सति तत्र अकृत्रिमत्वादि देवलक्षणं। कुतः संभवेत् तस्माद

न देवः पुंडरीकाक्षो न च देवस्त्रिलोचनः। न देवो देहरूपो हि न देवश्चित्तरूपधृक्॥ अकृत्रिममनाद्यन्तं देवनं देव उच्यते। आ

कारादि परिछिन्नेमिते वस्तुनि तत्कुतः। अकृत्रिममनाद्यंतं देवनं विद्धि शं विदुः। देवः कस्मादिति त्वेतत्त्वयमंता वदुच्यते।

तदेव देवशब्देन कथ्यते तत्प्रपूजयेत्। अज्ञातशिवतत्वानामाकाराद्यर्चनं कृत॥ योजनाध्वन्यशक्तस्य क्रोशं ध्वापरिकः

ल्पते। चिद्व्योमैव किलास्तीह पारावारविवर्जितं॥ सर्वत्रासंभवत्वेत्संयत्कल्पान्नेष्वशिष्यते॥ ॥ ॥

क्रमत्वादि लक्षणं देवनमेव चिद्धिवं चिद्रूपं शिवं विदुः। अज्ञातेति॥ अज्ञात शिवतत्वानां दृशं विद्धि वमजानतां। चिदिति।

पारावारविवर्जितं। उत्तरदृश्यावधिरहितं। अशंभवत्वेत्संदृश्यासंस्पृष्टं यद्वस्तु कल्पान्नेव शिष्यते। देवदेव चिद्व्योम सर्वत्रास्ति।

राम २५

बोधत इति। बोधस्तत्वज्ञानसाम्यं तस्य पूर्णता दृष्टिः शमो निर्विकारता विद्धि वश्य अप्राणि श्रेष्ठानि पुष्पाणि तैः शिवं पूज्यं विदुः अकृत्रिम
मिति। अबहिःसाधनसाध्यं बहिःसाधनानि बाह्यप्रयत्नैः असाध्यं केवलं सुखं तस्मात् सर्वोत्क्रान्त। देवार्चनादवाप्यते देव पूजायां वा
ह्याभ्यन्तर भेदे द्वे विध्यस्य वदुमाणत्वात्। बाह्य पूजां वक्ष्यति तदुचितां देवता माह। संविदिति सर्वकलातीता निवृत्ति प्रतिष्ठा विद्याशां
ति शांत्यतीता ख्य पंचकलाजीता पंचभूतात्म पंचकलातीतेत्यर्थः यदुक्तमवाक्त्वो भूमो निहत्ति उदिता पयसि प्रतिष्ठा विद्यानले

बोधः साम्यं शम इत्येतिपुष्पाणपयाणि तत्र तैः शिवं चिन्मात्रममलं पूज्यं पूजाविदो विदुः शमबोधादिभिः पुष्पैर्देव आत्मा
यदर्च्यते तत्तु देवार्चनं विद्धि नाकारार्चनमर्चनं। अकृत्रिममनाद्यंतमद्वितीयमखंडितं। अबहिःसाधनसाध्यं सुखं त
स्मादवाप्यते। संवित्सर्वकलातीता सर्वभावांतरस्थिता नित्यं सदसतोर्मध्ये सत्तासामान्यरूपिणी महासत्तात्म
तां प्राप्तादेवशब्देन कथ्यते विकल्पकलितसैवा विश्वरूपपरिस्फुता जाड्यं क्रमाद्भावयंती प्रयाति कलनास्पदं॥ ॥

त्मकं उत शान्तिरतीत शान्तिः व्योम्नीति याः किल कला किलयन्ति। तच्चं तासां हि उरत मसं च पदं त्वदीयमिति। सदसतोः कार्य
कारणयोः भावाभावयोर्वा मध्ये सत्ता सामान्यरूपिणी संविन्महासत्तात्मतां प्राप्ता अंतर्बहिश्च सर्वत्र परिपूर्णतया महा
सत्ताशब्दवाच्या सतीदेवशब्देन कथ्यते। विकल्पेति। सैव संविद्विकल्पकलिता जाड्यं भावयन्ती क्रमाद्वित्व रूपात्परिच्छे
तासती कलनापदं रूपभावं प्रयाति॥

वि॰ भ॰ २६

26

एतदेवविद्वणोति। देशेति। देशकालादिशक्तीनासुद्धासैःप्रभावैर्वलिता क्रमिता सती क्रमात् जीवोभूत्वा आसुबुद्धिर्भवति। पश्चादहंकारो भवति पश्चान्मनो भवति॥ मनस्त्वमिति संसारमवलंबते। मनोमूलत्वात्स्यायथाहे॥ कश्चिद्द्विजोवाल्यएवेशांतरंनीतोपि विमोहाद्यांडालैः सह विरसु खित्वात् तदीयान्नपानदूषितब्राह्मण्यः पश्चात्कथं द्विजत्वमुपहंतां। हंचांडालमिसततं सत्त्वं वंधादिति मन्यमानश्चांडालत्वमवलंबते॥ तद्वदित्यर्थः॥ यद्दयमिति॥ असौसंविदियमहमस्मीति परिछिन्नभा

देशकालादिशक्तीनासुद्धासैर्वलिता क्रमात्॥ जीवोभूत्वा भवत्यासुबुद्धिः पश्चादहंमतः॥ मनस्त्वं समुपायाता संसारमवलंबते चांडालोस्मीति मनना चांडालत्वमिव द्विजः॥ इयमस्मीति वोधेन देहास्या परिपातिनी॥ मग्नामोहमहापंके डुःखात् डुःखं व्रजत्यसौ॥ पुष्टं संकल्पमात्रेणायदिदंडुःखमागतं॥ तदसंकल्पमात्रेण क्षयिका॥ त्र कदर्थना॥ यत्किंचिदपि संकल्पनरोडुःखेति मज्जति॥ न किंचिदपि संकल्प्य सुखमव्ययमश्नुते॥ स्वविवेकानिलैः क्रुद्धा संकल्पजलदक्षयं॥ परानिर्मलतामेहि शरदीव नभोंवरं स्वसंकल्पनकालुष्यं विनिवार्यात्मनात्मनः परं प्रसादमासाद्य परमानंदवान्भव॥

वेन देहास्या सती परिपातनी देहाभिमानेन तदपायवती डुःखाडुःखं व्रजति पुष्टमिति॥ इदं संसारडुःखं पतयस्मात्कारणात्संकल्पमात्रेणोवोगतं ते नैव पुष्टेसे वर्द्धितं च तत्तस्मात्कारणांदसंकलनमात्रेणासंकल्पाभावेनैव क्षयिकी पतो अतोत्र संसारे का कदर्थिता न काविदित्यर्थः॥ ॥

भ॰ २६

सर्वेति। आत्मा सर्वशक्तिमयत्वाच्छक्तिमंडलस्य तांडवैरुच्छ्वासैः संसारं तं निहन्ति च सर्वमासादयतीति। शक्तयः का इत्यासां
क्याह॥ इच्छेति श्लोकद्वयं च वाक्यं। इच्छादीनां सत्ताहेतुत्वात्। अभेदोपचारेणैवैक्यमेवं सामानाधिकरण्यनिर्देशः। त
याहि कस्यचिद्वस्तुनः इच्छामात्रेणैव सत्ता संपद्यते। तथा सुखादेः कस्यचिद्व्योम्ना यथा शब्दादेः कस्यचित्कालेन यथा पल्ल

सर्वशक्तिमयोत्यात्मा शक्तिमंडलतांडवैः संसारं तं निहन्ति च सर्वमासादयत्यलं॥ समविन्मात्ररूपस्य सर्वस्या
नाकृतेरपि॥ इच्छासत्ता व्योमसत्ता कालसत्ता तथैव च॥ तथा नियतिसत्ता च महासत्ता च सुव्रता॥ ज्ञानशक्तिः क्रि
याशक्तिः कर्तृताकर्तृतापि वा इत्यादिकानां शक्तीनामन्तो नास्ति परात्मनः॥ ॥ ॥

वकुसुमादेः कस्यचिन्नियत्या यथा द्विपाद एव के वांछित वस्तूनां महासत्ता पुनः सर्वत्रास्ति प्रत्ययहेतुः आत्मनः
स्वरूपसत्त्वज्ञानशक्तिर्ज्ञानहेतुः। शक्तिरियं क्रियाशक्तिः कर्तृता क्रियासमवायहेतुः स्वाशक्तिः अकर्तृतास
द्विपरीता इत्यादीनां परात्मशक्तीनामन्तो नास्ति॥ ॥

स्त॰ ची॰ टी॰ उल्लासेति। संसारोज्जृम्भणाहेतुः उल्लासशक्तिः तन्निवृत्तिहेतुः निरोधशक्तिरित्यर्थः। तस्मादिति। श्लोकपंचकं वाक्यं यस्मादस्य देवस्य ध्यान
२७ मेव पूजनं तस्मादित्थं त्रिभुवनाधारं देवं ध्यानेन नित्यं पूजयेदित्यन्वयः। समस्ताभासभासनं सर्वेषां प्रकाश्यकानां सूर्यादीनामपि प्र
27 काशकं अन्तस्थचित्प्रकाशं शरीरान्तःस्फुरच्चित्प्रकाशरूपं स्वं सर्वेषां स्वरूपमन्तं आशये हृदये योऽयमहंभावः तस्यां सारं चिदचिदा
त्मके हंकारे चिद्रूपस्यैव सारमन्तत्वात् तदुक्तं प्रेक्षणके अहमित्यनिमबाधे चिदचिद्रूपे यदस्ति चिद्रूपं॥ यत्तत्साक्षादपरोक्षं स्वक्षं

उल्लासशक्त्या संसारः सर्वतः संप्रवर्तते निरोधशक्त्या निःशेषमयमायाति संक्षयं॥ पूजाक्रमेषु सर्वेषु देहदाहपवित्रकं
व्याप्यं देहावबोधात्म याद्यं यत्नात्पवित्रकं॥ एष देवः स परमः पूज्य एष सदा सतां॥ पूजनं ध्यानमेवात्र नान्यदस्यास्य पूजनं
॥ तस्मात्त्रिभुवनाधारं नित्यं ध्यानेन पूजयेत्॥ चिद्रूपं सूर्यलक्षाभं समस्ताभासभासनं॥ अन्तस्थचित्प्रकाशं स्वमहंल्लासा
रमाशये॥ अपारे परमाकाशे विपुलाभोगकंधरे॥ अनन्ताव्यक्तनाकाशकोशपादसरोरुहं॥ अनन्तदिक्कटाभोगभुजंगमं
डलमण्डितं॥ नानाविधमहालोकगृहीतपरमायुधं॥ हृत्कोशकोणविश्रान्तब्रह्माण्डौघपरंपरं॥ प्रकाशं परमाकाशपारगापा
रविग्रहं॥ ॥

ब्रह्मास्मि। स्वत्वमहमेवेदमिति। अपारस्य परमाकाशस्य यो विपुल आभोगो विस्तारः स एव कंधराकण्ठदेशो यस्य अनन्तस्याव्यक्त
नाकाशस्य यः कोशोऽभ्यन्तरविस्तारः स एव पादसरोरुहो यस्य नानाविधा ये महान्तो लोकाभ्युदयाः त एव गृहीतानि स्वहस्तगृहीतानि
स्वहस्तस्वीकृतानि परमाण्यायुधानि यस्य। हृत्कोशकोणविश्रान्तं ब्रह्माण्डौघपरंपरमिति सिसृक्षितभावित्रह्माण्डाभिप्रायेणेति ब
दितव्यं। प्रकाशस्य परमाकाशस्य पारगः पर्यन्तगः स्वयमपारश्च विग्रहो यस्येति॥ ॥

राम २७

ब्रह्मेति।भूतपरंपरा।तस्य देवस्य रोमालिरित्यर्थः।विविधे निर्गच्छ गदे वर्षं त्रैकल्पित संस्थानं पराधीनाक्रियं इच्छेत स्पराः
वः घटे निहित वः। इत्थंभूता इच्छाद्याः पूर्वोक्ताः शक्तयः यस्य शरीरगा श्चिंतनीयाः॥ अनंत इति। अनंतः निरवधिकाः
पराधारः परमात्मनः शक्तिरूपत्वात् तदाश्रयः सत्तामात्रैक विग्रहः जडरूपत्वात्।विवर्तिजगज्जालः विविधं प्रवर्ति तं जगज्जालं येनका

अधऊर्ध्वं चतुर्दिक्षु विदिक्षु च निरंतरं॥ ब्रह्मेहरिं रुद्रे शाद्यमुखामरमंडितां। इमां भूताश्रियं तस्य रोमालीं प्रविचिंतयेत॥ विवि
धारंभकारिणः पद्मिज गज्जंत्र रजवः॥ इच्छाद्याः शक्तयस्तस्य चिंतनीयाः शरीरगाः॥ एष देवः स्मपरमं रूप एव सदासतांधि
न्मात्रो ह्यनुभूतात्मा सर्वगः सर्वसंश्रयः॥ अनंतस्मपराधारः सत्तामात्रैकविग्रहः॥ विवर्जितजगज्जालः कालोस्यद्वार
पालकः॥ सर्वत्रेक्षणशक्त्याद्यं सर्वतो घ्राणशक्तिकं॥ सर्वतः स्पर्शनमयं सर्वतो रसनान्वितम्र सर्वतश्श्रवणाकीर्णं
सर्वत्र मननान्वितं॥ सर्वतो मननातीतं सर्वत्र परमं शिवं॥ इति संचिंत्य तं देवेश मर्चयेद्विधिवत्ततः॥ ॥

निचिज्जाग्रान्निवहिर्निस्सरयंति।कानिचित्त्वं तः प्रवेशं यंति।कानि।तु तथैव स्थापयतीतिकृत्वासोयं प्रसिद्धः। कालो यस्य दे
वस्य द्वारपालकः। द्वास्थ इव ईश्वरेच्छानुसारेण जगतां प्रवर्तनात्॥ सर्वत्रेति श्लोकद्वयं साईवाक्यं विश्वतश्चक्षुरित्यादि श्रुते
सर्वत्र सर्वेंद्रियशक्तियुक्तं सर्वतो मननातीतं मनोव्यापाराग म्यं सर्वत्र परमशिवं रूपं देवेशमेवं श्लोकप्रकारेण संचिंत्य
विधिवदर्चयेत॥ ॥

पा· टि
२८
28

पूजाविधौ विशेषं दर्शयितुमाह॥ स्वसंविदिति। अर्हत्रयं वाक्यं। अयं स्वसंविदात्मा देवो बाह्योपहारेणान पूज्यते किं तर्हि कोशलभ्येन शीतलेन चिंतासंतापरहितेन अविनाशिना एकेनैव बोधाम्भसा तेन पूज्यते। न केवलं बोधाम्भस्तु उपहार एव अपितु पूजापि तद्देवस्याह एतदिति॥ अनारतमविच्छिन्नं अनन्तस्य सर्वज्ञस्य चिन्मात्रस्य वेदनमनुसंधानं यदस्ति एतद्देवध्यानं एषैव परमा पूजा॥ अनारतानुसंधा

स्वसंविदात्मा देवो यं नोपहारेणापूज्यते नित्यमक्लेशलभ्येन शीतलेनाविनाशिना॥ एकेनैवाम्भसा तेनैव बोधेन स्वेन पूज्यते॥ एतद्देवपरंध्यानं पूजैषैव परा स्मृता। यदनारतमनन्तस्य शुद्धचिन्मात्रवेदनं॥ पश्यन्पृच्छन्स्पृशन्जिघ्रन्नश्नन्गच्छन्स्वपन्श्वसन्॥ प्रलपन्विसृजन्गृह्णन्नशुद्धः संचिन्मयो भवेत्॥ ध्यानोपहार एवात्मा ध्यानमस्य महार्चनं विना तेनेतरेणायमात्मा लभ्यत एव नो॥ ध्यानेनानेन सुमतेर्निमेषास्तु त्रयोदश॥ स्तोकोपि पूजयत्येशं गोसहस्रदानफलं भवेत्॥ पूजयित्वा निमेषाणां शतमेकमिति प्रभुं॥ अश्वमेधस्य यज्ञस्य फलं प्राप्नोति मानवः पूजयित्वा समात्मानं घटिकार्धमिति प्रभुं॥ अश्वमेधसहस्रस्य फलं प्राप्नोति मानवः ध्यानवस्तूपहारेण स्वयमात्मानमात्मना घटिकां पूजयेद्यस्तु राजसूयफलं भवेत् सः मध्याह्नं पूजनादिस्यं राजसूये कलक्षमाकादिवशं पूजयित्वैवं परे धाम्नि वशेन्नरः॥ ॥

न प्रकारमेवाह। पश्यन्निति। स्वसंनिधानमात्रेणाहर्यवत्सर्वेन्द्रियव्यापारान प्रवर्तयन्नयः सर्वस्य साक्षी स विशुद्धसंचिन्मात्ररूपोहमिति सर्वदानुसंदध्यादित्यर्थः॥ तदुक्तं हस्तामलके॥ निमित्तं मनश्चक्षुरादिप्रवृत्तौ निरस्ताखिलोपाधिकाकाशकल्पः रविर्लोकचेष्टानिमित्तं यथा यः स नित्योपलब्धिः स्वरूपोहमात्मेति॥ ॥

राम
२८

ध्यानकालातिशयेन फलातिशयं निरूप्य बाह्यपूजामुपसंहरन्नभ्यन्तरपूजामुपक्रमते एष इति अर्द्धत्रयं वाक्यं। परमा क्रिया परमं तपः॥ नित्यमिति। श्लोकद्वयं वाक्यं। शरीरस्थं देहाभिमानिनं जाग्रदाद्यवस्थासु वर्त्तमानमिममेव जीवं परं शिवं ध्यायेदित्यन्वयः। प्रवाहेति श्लोकद्वयं वाक्यं॥ प्रवाहपतितार्थस्य स्वबोधस्यानुद्धिमान् प्रवाहो ऽत्र बहिर्मुखचित्तवृत्तिप्रवाहः। तत्पतितस्तद्विषयार्थो घटादिः तस्य तत्र प्रतिफलितं तस्य च स्वरूपचैतन्यं च घटाद्याकारा या चित्तवृत्तिरिति विदितमात्मचैतन्यमित्यर्थः। तस्य बोधो ऽनुसंधानं तेन देवस्थानं

एषो ऽसौ परमो योगः इयं सा परमा क्रिया॥ बाह्यसंपूजनं प्रोक्तमेतदर्चनमात्मनः॥ इदानीं संप्रवक्ष्येह मन्त्रः पूजनमात्मनः। नित्यमेव शरीरस्थमिमं ध्यायेत्परं शिवं। शयानमुत्थितं चैव व्रजन्तमथवा स्थितं॥ स्पृशन्तमभितः स्पृशंत्यजंतमथवाभितः। भुंजानं संत्यजंतं च भोगानाभोगपीवरान्॥ प्रवाहपतितार्थस्य स्वबोधस्यानुद्धिमान्। नित्यावबोधाहरणाया बोधलिंगं प्रपूजयेत्॥ मनोमननशक्तिस्थं प्राणापानान्तरोदितं॥ हृत्कंठतालुमध्यस्थं भ्रूनासापुटपीठगं॥ खट्त्रिंशत्पदकोटिस्थमुन्मनं परतः परपथिगं॥ ६॥

हि प्रवाहपतितस्वरूपदेहार्थस्थितस्य स्वरूपस्यावबोधः तेनानुद्धिमान् पुष्टः सन् मनो मननशक्तिस्थं मननेशक्तिः। तत्स्थं तद्वर्त्तिकं प्राणापानयोरंतरेऽदितं तयोः प्रवर्तकत्वात्। तदुक्तं संवेन प्राणापानौ वहति च समो यो ऽभिधो ग्रासस्तं कोदेहस्थं तत्कं सपदि परमादित्यमाद्यं प्रपद्यत इति। हृत्कंठतालुमध्यस्थं हृन्मध्ये कंठमध्ये तालुमध्ये च स्थितं तत हृदादीनां मर्मस्थानतया तत्र विशेषणाभिव्यक्तं। भ्रूनासापुटपीठगं भ्रूमध्ये नासाग्रे चोपास्यं इत्युक्तं बोधरूपं लिंगं नित्यावबोधाहरणाया निरंतरानुसंधानरूपया पूजया प्रपूजयेत्। तल्लिंगं हि शक्त्यायुक्तं पिंडिकांतरोदितं मध्यस्थं पीठगं च भवति॥ तद्वदिदमिति भावः॥ ॥

नि॰ अ॰ ६ सहस्त्रेति। श्लोकपंचकं वाक्यं हस्तपादादित्यर्थ सर्व्वावयवशाम्रचैतन्यः। स्वदेहोवर्द्धमानोपश्चिमादाभासः अहंकाराप्रतिविंवितचैत
२९ न्यरूपोजीवाः अहमितिप्रतीयते। अयमेवदेवः। विंवप्रतिविंवयोरभेदात्॥ मनोहृशांवाह्येंद्रियाणि मनसोवाह्यार्थग्रहणसाधनत्वा
29 त्मनयेवहृग्रूपेषामिति। वहुव्रीहिर्वा मनोविनावाह्येंद्रियाणां स्वस्वविषयग्रहणसामर्थ्याभावात्तेषां मनोहृशानानाचारः पृथग्भूतव्यापारा
अतएवविचित्रावद्यः शक्तयोरूपादिग्रहणसामर्थ्यरूपाः पत्न्यः कांतं स्ववल्लभमिवमांसर्वेंद्रियशक्तिप्राणप्रदंजीवात्मरूपंदेवम
निशमुपासते॥ इत्थंभूतस्यदेवस्यमेनिवेदितजगत्त्रयं। विज्ञापितविश्वहत्तांतं मनएवद्वारपालः इंद्रियवाह्यार्थविषयाचित्तैवमेद्वारस्था

सहस्तपादावयवः सकेशनखदन्तकः॥ स्वदेहेसंविदाभासोदेवोयमितिभावयेत्॥ विचित्राः शक्तयोवह्योनानाचारमनोहृ
शां॥ उपासतेमामनिशं पत्न्यः कांतमिवोत्तमं॥ मनोमेद्वारपालोयंनिवेदितजगत्त्रयं। चित्तेयंमेप्रतीहारी द्वारस्थाबुद्धरूपिणी॥ ज्ञा
नानिचविचित्राणि भूषणान्यंगगानिमे॥ कर्म्मेंद्रियाणिद्वाराणि वुद्धींद्रियगणोस्महं॥ अयंसोहमनंतात्माप्यवच्छेदोज्झि
ताकृतिः॥ तिष्ठामिभरितैकात्मापूर्णः सर्व्वाविवृस्कः॥ ४॥

बुद्धरूपिणीविश्वसनीयावतीहारी अंतःपुरस्याविचित्राणिविविधवस्तुविषयाणिज्ञानानिचमेअंगानिअवयवगतानिभूषणा
निस्वरूपशोभाहेतुत्वात्। कर्मेंद्रियाणिवांगादीनिवुद्धींद्रियगणोः सहमेद्वाराणिवहिर्विहारहेतुत्वात्॥ अत्रचवुद्धींद्रियाणएवगणः
विचित्ररूपत्वात्। विश्विवोपासकत्वावद्ध अयमपरोक्षतयाप्रतीयमानः सोहंशिवरूपोहंव्यवच्छेदोज्झिताकृतिः परिछेदरहितस्वरूपत्वादनं
तात्मानिरवधिकात्मापूर्णाः सर्वैः पूरितः तस्मिन्पिसमस्तवस्तुसंभवात्॥ सर्व्वाविधुरकः अन्तर्यामितया सर्व्ववस्तुस्फुरणात्। इत्थंभरितैकात्मा अ

द्विति॥ यत्रूपत्तिष्ठामीत्येवंभावयेदित्यन्वयः॥

समइति। समः पूर्णत्वात्समरसाचारः रागद्वेषरहितत्वादेकप्रकारव्यवहारः समाभासः सर्वप्राणिनां चित्तेषु मम्मैवायं प्रिय इत्येकरूप
तया। भासमानः समाकृतिः सर्वदा निर्विकारत्वादित्यंभूतः सन् अव्ययमात्मानमेवं श्लोक्तिनप्रकारेण पूजइत्वा अलंसम्पक् सौम्यतां जी
वस्तु कृतामायातिसमयेति। देवविस्पृष्टोक्तिदेवस्वरूपतः चिन्मात्रं परं देवं समयारागादिरहितया सर्व्वया स र्वेन्द्रियजन्यया बुध्या यथायथा
प्रक्रमोल्येन सम्भवितव्यापारसिद्धेन सर्व्वार्थैन सव मर्च्चयेत॥ मनागिति। अत्र पूजाविधौ मनागपि ईषदपि अत्र सर्व्वस्तुनि उर्ब्बं भवस्तु

समस्समरसाचारसमाभासः समाकृतिः सौम्यनामत्नमायातिपूजयीत्वेवमव्ययं॥ समयासर्व्वयाबुध्या चिन्मात्रं देवचित्परं॥
यथाप्राप्तक्रमोल्येनसर्व्वार्थिनसमर्च्चयेत॥ मनागपिनकर्तव्योयत्नो त्रार्चवस्तुनि॥ कामसंवेदनेनाथपूजयेद्वेतनं शिवं॥ भ
क्ष्यभोज्यपान्नपानेननानावैभवशालिना॥ शयनामनयानेनयथासेनार्च्चयिच्छिवं॥ कान्तान्नपानसंभोगसंभारादिविलासिना॥ सु
खेन सर्व्वरूपेनसंवुध्यात्मनमर्च्चयेत॥ ॥

जाभायपत्नोनकर्तव्यः किंतर्हि कामसंवेदनेनइष्टवस्तुनिवेदनेनचेतनरूपं शिवं पूजयेत॥ एतदेवविवृणोति॥ कांतान्नपानसंभो
ग संभारादि विलासिना॥ कान्तैर्मनोहरैरन्नैः पानैः संभोगसंभारैः स्वस्कंदनादिभिरादिशब्दग्राह्यैरन्यैश्च सुखसाधनैर्विलासिना
सर्व्वरूपेणसर्व्वप्रकारेण सुखेनात्मानसंवुध्यसम्यक् शिवरूपं वुध्वा अर्च्चयेत॥ ॥

निर्वेद ३०

30

आवीति। अत्र दुःखस्य पापरूपकालुष्यनिवर्त्तकत्वाद् दहनादिकल्करूप्यवत्॥ आत्मोपयोगित्वात्सुखसाधनत्वं रूप्यं दारिद्र्येणेति। प्र
वाहपतितात्मना वासनाप्रवाहादागतेन विचित्रचेष्टारूपदेहेन दारिद्र्येण राज्येन वा शुद्धात्मानं देहादिव्यतिरिक्तमात्मानं समर्चयेत्। भोगानामि
ति अनिषिद्धानां रागेण अनिषिद्धानां त्यागेन चेत्यन्वयः॥ नष्टइति। एतन्नष्टोपेक्षणं प्राप्तोपादानेचेत्यर्थः। निर्विकारतया हर्षविषादादिविकार
निवृत्तीहेतुतया। आपातेति। आपातरमणीयं प्राप्यमिष्टहष्टत्वुपादेवमिव प्रतीयमानं सुखं यदस्ति तथा आपातसुदुःस्सहं प्रतिकूलतया

आधिव्याधिपरीतेन मोहसंरंभशालिना सर्वोपि दुःखेन प्राप्तेनात्मानमर्चयेत्॥ दारिद्र्येणाथ राज्येन प्रवाहपतितात्मना॥ वि
चित्रचेष्टारूपेण शुद्धात्मानं प्रपूजयेत् भोगानामनिषिद्धानां निषिद्धानां च सर्वदा त्यागेन वाथ रागेण स्वात्मानं शुद्धम
र्चयेत्॥ नष्टं नष्टमुपेक्षेत प्राप्तं प्राप्तमुपाहरेत्॥ निर्विकारतयैतद्धि परमार्चनमात्मनः आपातरमणीयं यत्तथापातसुदुस्स
हं॥ सुखं वा यदि वा दुःखं प्रवाहपतितं भवेत्॥ सर्वमात्ममयं कुर्यान्नित्यात्मार्चापरो नरः॥ सर्वदा सर्वरूपेण यत्सर्वत्र स्थितं हि
तत् सर्वब्रह्मेति निश्चित्य नित्यात्मार्चाव्रतं चरेत्॥

प्रतीयमानं दुःखं तत्साधनं च यत्तदेतदुभयमपि नित्यात्मार्चापरो नरः॥ आत्ममयं आत्मसमर्पणेन तद्रूपं नयति॥ सर्वदेति॥ सर्वदास
र्वस्मिन्काले सर्वरूपेण नानारूपेण सर्वत्र अन्तर्बहिर्दिक्षु च यद्वस्तु स्थितं तत्सर्वं ब्रह्मैवेति निश्चित्य नित्यात्मार्चाव्रतं चरेत्॥ प्रतीतस्य
सर्वस्यात्मार्पणेन ब्रह्मभावितत्वय एवात्मार्चनव्रतमित्यर्थः॥ ॥ एम

३०

नेति॥ज्ञेनज्ञानिनाअप्राप्तस्यअवांछताप्राप्तंचनत्यज्यतास्वभावतःस्वभावतःप्राप्ताभोगास्तुतयःसागरेणसरितइवभोक्तव्याःतद्
क्तंगीतासुआपूर्यमाणमचलप्रतिष्ठंसमुद्रमापःप्रविशंतियद्वत॥तद्वत्कामायंप्रविशंतिसर्वेसशांतिमाप्नोतिनकाम
कामीति॥उद्वेगइति॥सुस्थात्ववासुदृष्टिषुसूर्यन्त्यासूत्पसुपासुपदार्थप्रतिपत्तिषुज्ञेनउद्वेगचित्तविकारोनानुगंतव्यः॥चित्रे
षुनानुगंतव्यः॥चित्रेषुनानारूपेषुपक्षिमेघादिषुपदार्थेषुपातेतेषुवाम्नायथा॥उद्वेगविकृतिर्नानुगम्यतेतद्वन्नादेशेति

सर्वएवशिवप्राप्तिहेतुर्भक्तिवतामिह॥संचिन्मार्गेयमाक्षोद्दुःखमोहैस्त्रिधास्थितःननावांछतानात्यजताज्ञेनप्राप्ता
स्वभावतः॥सरितःसागरेणेवभोक्तव्याभोगास्तुमयः॥उद्वेगोनानुगंतव्यःसुस्थासुदृष्टिषु॥आम्नायचित्रपदार्थेषुप
तिता पतितेष्विव॥देशकालक्रियायोगात्प्राप्तउपैतिशुभाशुभं अविकारगृहीतेनतेनैवात्मानमर्चयेत्॥आत्मा
र्चनविधानेस्मिन्प्रोक्ताद्रव्यश्रियस्तुपाः॥एकेनैवशमेनैतारसेनपरिभाविताः नाम्लानकटुकोनातिक्तानकषा
याश्चकाश्चन॥चित्रैरपिरसैर्दिव्यामधुराएवताःकिल॥ ॥

देशकालकर्म्मवशात्शुभसमशुभंवायद्वस्तुउपैतिअविकारगृहीतेननिर्विकारस्वीकृतेनतेनैवशुभाशुभरूपेण
वस्तुनाआत्मानमर्चयेत्॥निर्विकारचित्ततारूपंशमंप्रसंसंत्याह॥आत्मेति॥श्लोकद्वयवाक्यं॥अस्मिन्नात्मार्च
नविधानेयाःशुभाशुभरूपाद्रव्यश्रियःपदार्थसंपदःप्रोक्ता॥ताश्चित्रैरसैर्दिव्याःउपचितात्रपिएकेनैवशमेनरसेन
भाविता वासितास्तस्योरसांतरैःअम्लकटुतिक्तक[illegible]षायादिकंपरित्यज्यमधुराएवभवन्तिकिलामाधुर्यमिहरम्यता॥

नि॰ व॰
३१

31

समतेति॥ समतारूपा मधुरात्वात्॥ रस्याखादनीयाया स्वरूपाशक्तिरस्ति तया रसशक्त्या भावितं यत् चेत्यं दृश्यं तत्सर्वं क्षणा
देवामृतं मधुरमेव भवेत्॥ इंदोः शुभ्रतम मृतमिव परं माधुर्यमायातीत्यन्यः शृणोति॥ ज्ञेन ज्ञानि नासमेन समत्विषा एकरूप
विशुद्धज्ञानिना अत्र पूर्णेंदुने व पूर्णेन स्वस्थेन चिद्घनैकेन ब्रह्मणा सह एकीभूतेन उपलरूपिणा पाषाणवन्निर्विकाररू
पेण भाव्यं॥ देशेति देशकालौ प्रसिद्धौ करणं शुभ व्यापारः॥ तेषां क्रमेण परिपाद्योदितैः सर्वेषां वस्तूनां सुखदुःखरूपे विभ्रमे

समता मधुरा रस्या रसशक्तिरतीद्रिया॥ तया यद्भावितं चेत्यममृतं तत्क्षणाद्भवेत्॥ समतामृतरूपेण यद्यत्तन्नाम विभाव्य
ते॥ तत्तदायाति माधुर्यं परमिंदोरिवामृतं॥ पूर्णेंदुनेव पूर्णेन भाव्यं समसमत्विषा॥ स्वस्थेन चिद्घनैकेन तेनाप्युपल
रूपिणा॥ देशकालकरणक्रमोदितैः सर्ववस्तुसुखदुःखविभ्रमैः॥ नित्यमर्द्वितशरीरनायकस्तिष्ठ शांत सकलेद्धयाधि
या॥ ॥ईश्वर उवाच॥ ॥अविद्यां श्रेष्ठया श्रेष्ठः क्षालयन्नेव तिष्ठति॥ मलं मलेनापहरत्युक्तितोरजकोयथा॥ ॥ ॥

ह्य॰ ग॰
३१

र्द्धिता सैर्न्नित्यमर्द्धितः॥ शरीरनायक आत्मा येन सता दृशः सन् शांतसकलेद्धयाधियोऽपलक्षितस्तिष्ठ। आत्मा चेति। तता
नस्यापेक्षितत्वात्। सिद्धये अविद्यामलक्षालनोपायमाह॥ अविद्यामिति॥ श्रेष्ठः प्राज्ञस्तु मान श्रेष्ठया शुद्धसत्वजन्यत्वात्
उत्कृष्टया विमलवासनारूपतया अविद्ययैव अविद्यां मलवासनारूपां क्षालयन्नेव तिष्ठति॥ यथा हि॥ युक्तिज्ञउपायवित् र
नकोवस्त्राणां मलं क्षारादिना मलेनैवापहरति॥ तद्वत्॥ ॥

अहेतवइति।वस्तुतस्त्वहेतवोपि गुरूपदेशाद्या चेष्टा अविद्यांशाः क्रमात्कृतस्थिउपादात्मज्ञानस्य सिद्धये कारणतां गताः।एतदेव स्पष्टीक
र्तुमाह॥ क्रमइति॥ गुरूपदेशानां क्रमेण शिष्यस्य बोधने प्रवृत्ते सति अनिर्देश्यरूपोपि त्वगाशाद्य प्रवृत्यां प्रतिपादयन्तु मध्य कोपि विशेषेण चिन्त
यित्वा अदृश्यरूपोपि साक्षात्कर्तुमशक्योपि आत्मा स्वयमेव प्रसीदति। प्रकाशते॥ तदुक्तं स्तनसंहितायां स्वच्छत्वनिमित्तु प्रायशस्तेः सांकृतया
स्थितः॥ त्वमानिवर्त्यमज्ञानः प्रसन्नेस्वेन तेजसेति। आत्मा शास्त्रैर्गुरुवाक्यैश्चइदं तया नावबुध्यते किं तर्हि स्वबोधवशतः स्वरूपाप्रसे

अहेतवोप्यविद्यांशाः श्रेष्ठाः कारणतां गताः क्रमाद्गुरूपदेशाद्या आत्मज्ञानस्य सिद्धये॥ क्रमे गुरूपदेशानां प्रवृत्ते शिष्यबोधने॥ अनिर्दे
श्यो अप्यदृश्योपि स्वयमात्मा प्रसीदति॥ शास्त्रार्थैर्बुध्यते नात्मा गुरोर्वचनतो न च॥ बुध्यते स्वयमेवैष स्वबोधवशतः स्वतः॥ गुरूपदेशश
स्त्रार्थैर्विना चात्मा न बुध्यते॥ एतत्संयोगसत्त्वेव स्वात्मज्ञानप्रकाशिनी॥ गुरुशास्त्रार्थशिष्याणां चिरसंयोगसन्नया॥ अहर्निशजनाश्र
रआत्मज्ञानं प्रवर्तते॥ एवं देवार्चनं नित्यं तः कुर्वन्मुनिनायकः॥ यत्रास्मदादयोप्यल्पास्तत्प्रयाति परं पदं॥ ॥ ॥

धातमहिम्ना स्वतएव बुध्यते॥ यदि स्वतएवात्मा बुध्यते तर्हि गुरुशास्त्रादिभिः किमित्याशंक्यतद्रुपर्यायोगिप्रकारमात्माह॥ गुरूपदेशेति
॥ एतत्संयोगसत्त्वेव तेषां गुरुशास्त्रार्थशिष्याणां सन्निधि सत्त्वेव स्वात्मज्ञानप्रकाशिनी गुर्विति। अहर्निशं सूर्यसंनिधौ जनाचारो लोक
व्यवहारएवमिति। अस्मदादयो हरिहरादयोपि यत्र यस्मिन्परब्रह्मपदे अल्पाः अल्पवन्निकृष्टावर्त्तन्ते इत्यर्थः॥ ॥ ॥

नि॰ प्र॰ ६ आत्मार्चनं सर्वं ब्रह्मेति निश्चित्य नितरां स्मार्यां ब्रतं चरेत् इत्युक्तं । तत्र जगतश्चिन्मयत्वेन ब्रह्मसमावं प्रतिपादयितुं विधिन त्विक्रियां प्रस्तौति प्र
३२ अविद्यमानमिति ॥ आभासमात्रं संविन्मात्रमेव यइति । यः प्रसिद्धः असौ परोक्ष नया प्रतीयमानो ब्रह्मादिशब्दार्थः ब्रह्म परमात्मा परं ज्यो
तिरित्यादिशब्दानामर्थः प्रतिपाद्यं वस्तित्तिरतां केवलां विशुद्धां चितं विधिसैव चिद्देयं गच्छंतीवसतीनामयोग्यतायाति । कृष्णादिति ॥ सैव विद्या

अविद्यमानमेवेदं विद्यमानमवस्थितं आभासमात्रं त्रिजगन्नाऽन्यदस्ति मुनीश्वर ॥ योसौ ब्रह्मादिशब्दार्थः संविदं विद्धि केवलां
सावेद्यमिव गच्छतीया तिचिंतामयोग्यतां कृष्णाद्भावितवेद्यत्वादहंतामनुगच्छति । प्रमात्राज्ञावनयात्स्वप्नेवन वारणतामिव ॥ अ ॥
स्या अहंताद्रूपायादेशतां कालतां गतः संपद्यं तेस्वयं शून्य रूपिरूपः स्सद्य एवतां ॥ ॥ ॥

विततवेद्यत्वाज्ञाविततं वेद्यं रूपं जयात्तस्याभावः तत्वेत स्माद्यतादात्म्यभावनाद्धेतो ॥ रहंकाररूपतामनुगच्छति प्रमात्स्वप्नेवारणभावनय ।
वारणतामिव ॥ अस्या इति ॥ अहंतारूपाया अहंकाररूपं प्राप्ताया अस्याश्चितो नानारूपास्ता एव शक्तयो देशकालरूपतां गताः सत्यस्व
यमेवसरसः संपद्यते सहायरभावं प्रतिपद्यंत इत्यर्थः ॥ ॥ राम ३२

तामिरितिासैवचिन्मयीसंज्ञायानाभिदृशकालादिशक्तिभिः संवलिताचेदेतासतीजीवाभिधानिकाजीवरूपाभूत्वा अज्ञपदेस्थितासतीबुद्धित्वंबुधिरू
पतामायातिाजीवेतिाजीवशक्तिःजीवरूपाविद्धक्तिःतथाभूताबुद्धित्वंप्राप्ताअतश्चनिश्चयैकविलासिनीबुद्धेर्निश्चयात्मकत्वानिश्चयेनैकेनैवविल
संतीशब्दशक्त्यादिभिरनुगम्यतेतत्रशब्दव्यवहारहेतुः।शब्दशक्तिःएवंज्ञानव्यवहारस्यक्रियाव्यवहारस्यहेतुज्ञानक्रियाशक्ती।मिलितेवेति।एष
गणः पूर्वोक्तोहंकारादिसमूहः।शब्दशक्त्याद्यनुगतःस्मृतिश्चमरणशक्तिंसमस्तकल्पयन्नसंकल्पशाखिनोवीजभूतंशुद्धात्मस्वरूपंमनोभव

त्वाभिः संवलितोसैवसंज्ञाजीवाभिधानिका॥भूत्वाबुद्धित्वमायातिनित्यमज्ञपदेस्थिता॥जीवशक्तिस्तथाभूतानिश्चयैकविलासिनी॥
शब्दशक्त्याक्रियाशक्त्याज्ञानशक्त्यानुगम्यते।मिलितैवैषगणःक्षिप्रस्मृतिसमस्तकल्पयन्॥मनोभवतिशुद्धात्मवीजंसंकल्पशाखि
नः॥आतिवाहिकदेहोक्तिभाजनंतद्विदुर्बुधाः॥प्राणमर्षैकरूपिण्योत्थतंतास्तस्यशक्तयः॥व्योमादिरूपतामेत्यजगन्नानाविभातितत्।शू
न्यएवहिवेतालइवेत्यंचिन्नवासना॥उदितेयजगत्रांभ्रांतिस्तज्ञ्यांतोशांतिरस्तुता॥ ॥ ॥ ॥

ति।शून्यात्मेतिपाठेमायाकल्पिताकारमित्यर्थः आतिवाहिकत्तिसार्द्धेनतदेवमनः आतिवाहिकदेहोक्तिभाजनंआतिवाहिकदेहइत्युक्तेरपिवि
षयंविदुःमनएवआतिवाहिकदेहइत्यर्थः।तदेवमनःसृष्टिप्रकारणोक्तप्रकारेणव्योमादिरूपतामेत्यनानारूपंसन्जगत्तयाविभाति।शून्य
इति।यथाहिवेतालःकल्पितत्वात्शून्यएवनपरमार्थइत्यमनेनैवप्रकारेणाधिन्नवासनैवजगत्भ्रान्तीजगद्रूपाउदिताअतस्तस्याचिन्न
वासनायाःशांतौसत्यां अस्तुताजगतःशांतिःकैवल्यमित्यर्थः॥

नि·प्र·६ अहंतायामिति यो नरः अहंतादिष्ठ सास्थः बुद्धिभक्तः तं हतनरं धिक अ सावि ह अस्त विद्यायां नोपदेशार्हः जीवमिति । इह तस्याः अस्त विद

३३ :विवेकिनमधिकारिणमेव उपदिशंति बोधयंति । उ मूमं अ मूत विपरीतज्ञानं अतएव आर्यैः सभ्यैः अन्यैर्युक्तं परित्यक्तं असन्मयं अवि

द्यमानकल्पं बालं मूर्खं नोपदिशंति । यस्माद्धेतोः योऽपमीदृश प्रशास्ति स दुष्टः सः स्वप्नदृष्टपुरुषाय कन्यकाप्रदानमिव व्यर्थमित्यर्थः । अ

33

अहंतायां जगति च मग्नं तत्साजले वयः ।सास्थास्तं धिक्कृहतनरं नोपदेशार्हस्स साविह ।। जीवविवेकिनमिहोपदिशंति तज्ज्ञा नो बालमु

द्धमसन्मयमार्यमुक्तं ।। अज्ञं प्रशास्ति किल यः कनकावदातां स स्वप्नदृष्टपुरुषाय सुतां ददाति ।। ।।ईश्वर उवाच ।। ।।यथा पृष्टं मुने

प्रोक्तं वयि कल्पाणमस्तु ते । देशं प्रयामो अभिमतमागच्छेति ह्यपार्वती ।। ।।वशिष्ठ उवाच ।। ।।इत्युक्त्वा नीलकंठे सौत्पन्नपुष्पांजलौ

मयि ।। तताऽरपरिवारेण सममंबरकोटकं ।। ततः प्रभृति तेनैव क्रमेणार्वनमात्मनः ।। अद्य यावत्कृतं व्यग्र बुद्धिर्वं निहमवस्थितः ।। अ एम

नेनार्चाविधानेन मये मारामवासना ।। अखिन्नेनैव वाह्यं ते व्यवहारपरा अपि ।। यथाप्राप्तक्रियाचारकुसुमैरात्मनोऽर्चनं ।। बुद्धिन्न ३३

मप्यच्छिन्नं मेन कदाचिदहर्निशं ।। ।।

नेनेति ।। इमाः संसारवासनाः अखिन्नेनैव विक्षेपरहितेनैव मया अतिवाह्यं ते नीयंते । यथेति । यथाप्राप्तक्रियाणां आचाराः अनुष्ठानानि

तैरेव कुसुमैरात्मार्चनं विच्छिन्नमपि लौकिकदृष्ट्यां विच्छिन्नतया प्रतीयमानमपि मे निरंतरानुसंधानवतः अहर्निशं कदाचिदपि न च्छि

न्नं भवति ।। ।।

नत्वेतादृशमेवात्मार्चनं सर्वसुलभमेवेत्याशंक्य योगिनो विशेषमाहि॥ ग्राह्येति। सर्वेषामपि देहिनां ग्राह्यग्राहकसंबंधः सामान्यए
व तथापि पामरा वहिर्दुःखितया बुभुक्षापिपासादिभिः पीडिता विचित्रमन्नपानादिकं भोक्ष्यामहे पास्यामहे इति। आकुला भवंति। यो
गी तु पूर्वोक्तप्रकारेणात्मैव देवता इयं च विचित्रा भोगसंपदस्ये वस्तुजेति सावधानो वर्त्तते इति विशेषः। तस्मात्तत्संधानमेव

ग्राह्यग्राहकसंबंधः सामान्यः सर्वजंतुषु॥ योगिनः सावधानत्वं यत्तदर्चनमात्मनः ॥ दृष्ट्वा ऽनया रघुपते संगमुक्तेन चे
तसा॥ संसारविरलारण्ये विहरास्मिन्न खिद्यते ॥ श्रीराम उवाच ॥ इदानीं संशयो ब्रह्मन्न विनिष्टो विशेषतः ज्ञातं ज्ञा
तव्यमखिलं जाता तृप्तिरकृत्रिमा ॥ परमतेधाम परेर्द्दलिताशामतंगजां। संसारसमरे सम्प्राधीरतामागतं मनः॥ परिग
लितकल्पनामपेतं प्रसमितवांछमदीनसारसत्वं। त्रिजगति पदति प्रसन्न रूपं प्रमुदितमत्र खल्वन्नमममनो मे॥ ॥ इ
निर्वाणप्रकरणे देवपूजोपाख्यानं नाम त्रिंशः सर्गः॥ ॥

पूर्वोक्तमात्मार्चनमित्यर्थः। परमिति। दलिताशामतंगजां विदलितदिग्गजां निवर्त्ततमनो रूपमातंगमिति। वा। परीति
मे मनः विकल्परहितं गलितवांछं अदीनं दैन्यरहितं अत एव सारसत्वं उत्कृष्टज्ञानं प्रसन्नं रूपं प्रमुदितं च सत् तत्र मंसर्वो
त्तमं वर्त्तत इत्यन्वयः ॥ इति श्री संसारतरणिनाम्नि वासिष्ठविवरणे निर्वाण॥ ॥

नि·वृ·टी सर्वमपूर्वेणादेवपूजाविधानोनचित्तस्यांतर्मुखतयानिर्वाणमपिसूक्तं।इदानीमद्वितीयंब्रह्मैवांतर्भावितसर्वार्थमाध्य
३४ स्थितमपिसर्वत्रबिल्वफलंनिदर्शयंत्रारब्धांनांतरमारभते॥तत्रचित्तसमाश्रयेप्रकारांतरेणाबोधयितुंउपक्रमतेयथे
तिवांछितंवस्तुप्रथमप्राप्तिक्षणेयथातुष्ट्येभवति।तथाप्राप्त्येकक्षणाव्याप्तिसंबंधिनएकस्मात्क्षणादूर्ध्वंतुष्ट्येनभव
तिकोनानुभूतवान्॥अयमर्थः।सर्वैरेवानुभूयतइत्यर्थः॥तस्मादस्मिंक्षणसुखेबालएवासक्तिंबध्नातिनेतरःयेरा

34

श्रीरामउवाच॥तववाक्यसुधासेकैर्नतृप्तिरुपजायते।भूयःकथयमेब्रह्मन्कांचित्तत्वमयींकथां॥वसिष्ठउवाच
यथाप्राप्तिक्षणेवस्तुप्रथमेतुष्टयेतथा॥नप्राप्त्येकक्षणादूर्ध्वमितिकोनानुभूतवान्॥वांछाकालेयथावस्तुतुष्ट
येनाल्पदातथा॥तस्मात्क्षणसुखेसक्तिंबालोबध्नातिनेतरः॥वांछाक्षणेतुयातुष्टिस्तत्रवांछैवकारणं॥तुष्टिंस्त्वतुष्टि ३४
पर्यंतातस्माद्वांछांपरित्यज॥ ॥

वान्॥तदपिक्षणसुखंकल्पितमेवनवास्तवमित्याह॥वांछेति॥वांछाक्षणेतुयातुष्टिरुत्पद्यतेतत्रतस्यांतुष्टौवांछैव
कारणंवांछान्वयव्यतिरेकाभ्यांविधाययित्वातुष्टेःसाकल्पितापितुष्टिरतुष्टिपर्यंताअतुष्टौपर्यवस्यति।तस्माद
नर्थपर्यवसितांक्षणसुखहेतुवांछांपरित्यज॥ ॥

आशेति। अतश्च असंगेन विषयेष्वनास्थया जीवता व्यवहारवतस्तव आशा भविष्यत् दृष्टवस्तुवांछा निराशत्वं न उद्यमत्वं प्राप्य भा
वना विषयवासनाया अभावं याउ। मनश्च निर्वासनं सत् अमनस्त्वं निर्विकल्पतां याउ वासनेति। अतश्च त्वं वासनारहितैरिंद्रिये
श्चक्षुरादिभिः क्रियामाहरन्॥ अनुतिष्ठन्नप्यंतरंतःकरणे विकारं नाप्नोषि क्षोभयतैर्वातवर्षादिभिः विक्षोभ्यमानैरपि खमाकाशं यथा
विकारं नाप्नोति तद्वत्॥ चित्तेति। चित्तस्योन्मेषनिमेषाभ्यामाविर्भावतिरोभावाभ्यामेव संसारप्रलयोदयौ भवतः तस्मात्त्वमेव मनो

आशायात निराशत्वमभावं याउ भावनं॥ अमनस्त्वं मनो याउ तत्वासंगेन जीवतः॥ वासनारहितै रक्षैरिंद्रियैराहरन्क्रियां
न विक्रियामवाप्नोषि खवत्क्षोभशतैरपि ॥६॥ चित्तोन्मेषनिमेषाभ्यां संसारप्रलयोदयौ। वासनाप्राणसंरोधादनिमे
षं मनः कुरु ॥७॥ प्राणोन्मेषनिमेषाभ्यां संसृतेः प्रलयोदयौ। तमभ्यासप्रयोगाभ्यामुन्मेषरहितं कुरु ॥८॥ ॥ १

वासनासंरोधात्॥ प्राणसंरोधात् ध्यानपूर्वोक्तादनिमेषं विलीनं कुरु॥ प्राणेति प्राणस्पंदस्यापि चित्तस्फुरणे हेतुत्वात्॥ संसृति
तुल्यमतस्तमपि प्राणमभ्यासप्रयोगाभ्यां पवननिरोधाभ्यासात् प्रकृष्टयोगात् मनोनिरोधाच्चानिमेषमस्पंदं कुरु अमनस्त्व
वक्ष्यते येन यत्नेन वध्यत इति मनोनिरोधस्यापि प्राणनिरोधहेतुत्वात्॥ ॥ ॥ श्रीगोपालाय नमः॥ ।

नि·प्र·६ मोक्षेति॥मोक्षमज्ञानं तदपि कर्मद्वारा संसारहेतुः॥तथाहि अज्ञानादन्यथाज्ञानं तस्माद्रागद्वेषौ ताभ्यां पुण्यापुण्यप्रवृत्ति
३५ प्रवृत्तिः ततो जन्मादि दुःखमयः संसारः इति तन्मोक्षं गुरुशास्त्रार्थसंगमैः॥गुरूपदेशात शास्त्रार्थानुसंधानात्तं यथा बला
त्पुरुषप्रयत्नादिति लीनं च नष्टं कुरु॥असंविदिति॥चित्तं कर्तृ असंवित्त॥स्पंदमात्रेणास्पंदो संविदः स्पंदो बहिर्मुखतया स्फु
35 र्त्तिस्तदभावो संवित्स्पंदः तन्मात्रेण वा प्राणानिरोधेन वा अचित्तता निर्विकल्पत्वं याति॥तदेवाचित्तत्वमेव परं पदं मुक्तिः॥दृश्येति॥
दृश्यदर्शनसंबंधे अभिमतविषयाणां इंद्रियैः संबंधे सति यत्पारमार्थिकं परमार्थभूतं स्वात्मनि संभूतं सुखमाविर्भवति॥तदेका

मोक्षो त्वमेष निमेषाभ्यां कर्मणां प्रलयोदयौ॥तद्विलीनं कुरु बलाद्गुरुशास्त्रार्थसंगमैः॥असंवित्स्पंदमात्रेण याति
चित्तमचित्तता॥प्राणानां वा निरोधेन तदेव परमं पदं॥१॥दृश्यदर्शनसंबंधे यत्सुखं पारमार्थिकं॥तदेवैकान्तसंविस्रा
ब्रह्मदृष्ट्या मनःक्षयः॥यत्र नास्तुदितं चित्तं तद्वै सुखमनुत्तमं॥क्षयातिशयनिर्मुक्तं नोदेति न च शाम्यति॥ ॥ राम ३५

तसंवित्या अंतशब्दः स्वरूपवाची तस्य पारमार्थिकसुखस्यांतः स्वरूपं तस्यैव एकांतसंवित्या निरंतरानुसंधानेन ब्रह्मसंवित्स्रा
स्वरूपासुखसंवित्तिरेव ब्रह्मदृष्टिरित्यर्थः॥अयमात्मा ब्रह्मेति श्रुतेः तया ब्रह्मदृष्ट्या मनसः क्षयो लयः स्यात्॥चित्तलये सति त
देव स्वरूपसुखं कैवल्यसुखं संपद्यत इत्याह॥यत्रेति॥यत्र यस्मिन्सुखे चित्तं नास्तुदितं चित्तहेतुत्वयः संकल्पविकल्पादयोऽय
ती॥तदेकवाह्यतिमं सुखं निजानंदः कैवल्यसुखमिति यावत्॥तत्र क्षयातिशयनिर्मुक्तं नित्यं निरतिशयं चेति ज्ञातानोदेति न च शा

ननुज्ञानिनश्चित्तलयाभावात्कथं जीवतो मुक्तिरित्यत्राह। ज्ञस्येति ज्ञस्य चित्तं न चित्ताख्यं चित्तमिति नाख्यायते। किं तर्हि तज्ज्ञाचित्तमिति नाख्यायते
किं तर्हि तज्ज्ञचित्तं सत्त्वमुच्यते॥ ब्रह्मैवेत्यर्थः। यस्मात्कारणात् नानार्थान्यत्वभाक्। नानारूपैः कामभल्पादिरर्थैरन्यत्वभोक्तृब्रह्मणः सकाशाद्भेदभा
वो च चित्तं चित्तशब्दार्थः ज्ञस्य तु चिते बोधात्परिपूर्णब्रह्मबोधात्। तद्भिन्नं सत्त्वमापद्यते॥ यथा ताम्रं पुद्गिवशात्सुवर्णभावमापद्यते॥ तद्वच्चित्त
मिति। चित्तं कर्तृजगत्स्थितौ। किंचित्कालं विहृत्य तु तुस्थायां श्रवणमननादिक्रमात्। समाध्यवस्थायां श्रवणमननादिक्रमात्। समाध्यवस्थायां सि

ज्ञस्यां चित्तं न चित्ताख्यं ज्ञचित्तं सत्त्वमुच्यते॥ नानार्थान्यत्वभाक् चित्तं बोधात्ताम्रं सुवर्णवत्। चित्तं चित्तत्वमायाति किंचित्कालं जगत्स्थितौ॥ वि
हृत्य तुर्यावस्थायां तुर्यातीतं भवत्यतः। ब्रह्मैव भूरिभुवनभ्रमविभ्रमोद्यैरित्थं स्थितं सममनेकमथैकमेव। सर्वात्मसंभवति नेतर
हेगां किंचिद्विन्नादिकं च न हृदीव हि संनिवेशः॥१५॥ वशिष्ठ उवाच॥ अत्रेमामवबोधार्यविश्रमयोद्यो सशालिनी। त्रय्यूर्वाचे
दं
वसंक्षेपाद्गामरम्यां कथां शृणु॥१६॥

द्यायां चित्तत्वं चित्स्वरूपमायाति॥ अतः परं तुर्यातीतं भवति॥ जाग्रदादित्रयेसति तस्यापेक्षया समाध्यावस्थायां तुर्यत्वं। सर्वदा समाधौ
जाग्रदाद्यभावात्। तुर्यत्वमपि नास्तीत्यर्थः॥ ब्रह्मेति॥ सर्वात्मत्व ब्रह्मैकमेव भूरिभुवनभ्रमविभ्रमौद्यैर्भूरिभिर्भुवनभ्रान्तिवि
लासपरंपराभिः इत्थं विपद्यादिप्रकारैरप्यनेकतयां समं युगपदेव। स्थितं। इतरच्चित्तादिकं किंचिदत्र नास्ति। संनिवेशः संस्था
नं च व्योमादीनां प्रतीयमानेन। तेन तु प्रतीतस्यापि मिथ्यात्वं च कदृष्टमित्यत्राह॥ हृदीवेति॥ यथा स्वप्नदशायां हृदि चित्ते प्रती
यमानं वस्तुतः संनिवेशशून्यं। तद्वत्॥

वा॰शि योजनानामिति ॥ श्लोकत्रयेणाह । विद्वानमेतद्गगनसर्वार्थब्रह्मैवापूर्वाफलत्वेन निरूप्यते ॥ अजरद्रूपं ब्रह्म गोजरादिविकाररहितत्वात् ॥ पुराणा
३६ मपि वालेंदुशकलवन्माद्दविनसुंदरं आनंदमयत्वात् ॥ अगालितं निष्कर्मत्वात् ॥ वैपुल्येनापरिछेद्यं ॥ अनंतत्वात् तज्जगत्स्थितेराद्यं मूलं ॥
उपादानत्वात् ॥ इत्थंभूतं महद्बिल्वफलमस्ति तस्छेति ॥ तछेति ॥ तस्य बिल्वफलस्य समीपतः उच्चैर्ब्रह्मांडान्यपि शैलाधछिन्नां राजिका

36

योजनानां सहस्राणि विपुलं स्फुटं ॥ पुरोरथ्यइ अद्भूपमस्ति बिल्वफलं महत् ॥ पुराणामपि वालेंदुदलमार्द्दवसुंदरं ॥ महाकल्पा
न्तवात्यापाअपि वौरवालितं ॥ योयनायुतकोटीनां कोटिलक्षशतैरपि ॥ वैपुल्येनापरिछेद्यं मूलमाद्यं जगत्स्थितेः ॥ तस्या
बिल्वफलस्योच्चैर्ब्रह्मांडानि समीपतः ॥ हरन्ति लीलां संसाधोराजिकाकणयेद्दने ॥ नकदाचनापाकेन पातान्तेन समेति त
शसद्दैव पक्कमथ्यं गाजेरसायनवाध्यते ॥ समस्तफलसारस्य फलस्यस्यमहात्कृतेः ॥ अन्तर्मज्जत्वमायाति संविछक्तिचमत्कृतिः ॥

कणानां पद्दते लीहरंतिकिं वर्णपतितन्महत्वामित्यर्थः राजिकाकृष्टसर्षपः नेति ॥ तत्फलं कदाचन पातपर्यंतेन पाकेन न समेति न संयुज्यते नित्यत्वा राम
त् समस्तेति ॥ समस्तफलसारस्य परमपुरुषार्थस्वरूपत्वात् ॥ अस्य प्रकृतस्य फलस्य संविच्छक्तिचमत्कृतिः ॥ विच्छक्तिः स्फूर्तिरेवअंत ३६
र्मज्जत्वे अंतस्थितसारत्वमायाति ॥ ब्रह्मणः संवित्सारत्वात् ॥ ॥

नि॰प्र॰ ३७ सर्वविदिति। ततविल्वफलस्यांतंततयातरलरूपयावद्गविक्षपरिणामतयासुरूपयासंनिछक्यासमेनिजएवरूपे इत्येवंक्रमाणाप्रकारेणद
कुसिस्टक्रमपूर्विका दृष्टिःसंप्रसारिताप्रवर्त्तिता॥ तमेवप्रकारमाह॥ इदमिति॥ द्वाभ्यांमंडखुकाजगतिनियंत्रमुघता।निमेतिरियंस्प
दरूपिणीवलस्वभावक्रियारूपाशक्तिरियंनिजमज्जावमत्वकृतिः निजायाः संविछक्तेः स्फूर्त्तिः सर्वस्यापिप्रपंचस्यसंविद्विलासरूपता
संविछक्यातयातत्रततस्तारलरूपया। निजएवसमेरूपेदृगित्यंसंप्रसारिता॥ इदंव्योममहानन्तमियंकालमयीकला। इयंनियति
उयुक्ताक्रियेयंस्पंदरूपिणी॥ ब्रह्मांडमंडपमिदमिमाश्चाशाक्रमोह्ययं॥ इतिसातस्यविल्वस्यनिजमज्जावमत्वकृतिः॥ २५॥ श्रीराम
उवाच॥ भगवन्सर्वसाक्षात्वयैषाविल्वरूपिणी॥ महाविघ्नसत्तेहकथितेतिमतिर्ममाचिन्मज्जारूपसखिलंमहत्वादीदमा
ततं॥ नमनागपिभेदोस्तिद्वैतैक्यकलनात्मकः॥ यथाब्रह्मांडकूष्मांडमज्जामेर्वादिसंस्थितिः। तथाचिद्विल्वमज्जेयंब्रह्मांडादि
जगस्थितिः॥ २६॥ इतिनिर्वाणप्रकरणेविल्वोपाख्यानंनामैकत्रिंशःसर्गः॥ ॥ ॥
ता। भगवन्निति॥ महाविघ्नसत्तामहतीद्विघ्नस्यब्रह्मणःसत्ताविदितेत्यहंत्तादि॥ अहंकारप्रकृतिमहदादिभिराततंविस्तीर्णमिदमखि
लंजगन्नचिन्मज्जारूपंअतश्चमनागपिद्वैतैक्यकलनात्मकोभेदाभेदविचाररूपोभेदोभेददृष्टिर्नास्ति॥ ॥इतिश्रीमद्वाल्मीकिरक्त
नापदवाक्यप्रमाणपारावारप्रमाणपारदृश्वनाविरचितेवासिष्ठविवरणेविल्वोपाख्यानंनामैकत्रिंशःसर्गः॥ ॥ ॥
37
राम ३७

पूर्वसंदर्भावितसर्वार्थमवद्वितीयमेवचैतन्यंबिल्वफलत्वेननिरूपितं।इदानींतुविचित्रविचित्रतापिश्चसर्वैकरसानिर्विकल्पाघनीभूतासं
वचिन्महाशिलात्वेननिरूप्यते।अथेत्यादिना॥विचित्रामस्रुनशूर्वांअतश्चविधस्मयकारिणीं।स्निग्धेति।स्निग्धासिन्नप्रेमास्पदत्वात।स्व
प्रस्वयमेवप्रकाशमानत्वात॥मृदुस्पर्शासुखहेतुत्वात॥महाविस्तारशालिनीनिरवधित्वात।निविडासंततत्वात।नित्यनीरंध्राविजाती
यस्वमिश्रितत्वात।इत्थंभूतामहाशिलाक्वचिदस्ति।स्वव्यतिरिक्तस्याभावस्यनिरूपयितुमशक्यत्वात।क्वचिदित्युक्तंसभगवन्कस्मिन्
प्रतिष्ठितइतिस्वमहिम्नीतिश्रुतेः।तस्यामितिश्लोकद्वयंसर्वंवाक्यं।अत्रपद्मानांत्यनेनभुवनानिविकसितानिसंकोचविकाशयोगित्वा

वशिष्ठउवाच।अथमामिंदुवदनचित्रांविस्मयकारिणीं॥वर्ण्यमानांमयारम्यामन्यामाख्यायिकांशृणु॥१॥स्निग्धास्वच्छाम्र
डुस्पर्शामहाविस्तारशालिनी।निविडानित्यनीरंध्राक्वचिदस्तिमहाशिला॥२॥तस्यामंतःघनछन्नानिपद्मानिसुबहून्यपि।सरस्या
मिवरम्याणिसम्पन्नानिराघव।अन्योन्यप्रोतपत्राणिमिथोविघटितानिच॥३॥मिथश्चोपरिसंस्थानिमग्नानिचकानिचि॥
न्ऊर्ध्वमूलान्यधोमूलान्यमूलानीतराणिच॥ ॥

त॥जीवघनाश्रयत्वाद्घनानिचकानिचिदन्योन्यप्रोतपत्राणिपरस्परसंबंधवंतिकानिचिन्मिथोविघटितानिसंबंधरहितानि।तेषां
चमध्येकानिचिदूर्ध्वमूलानिअमरादिभुवनानामुपरिस्थितध्रुवमंडलाश्रयत्वात्कानिचिदधोमूलानिपातालानांभूलोकस्याध
स्थितकूर्माश्रयत्वात।कानिचिदमूलानिशिवविष्णुलोकादीनांनित्यत्वात।इतराणिचेत्यनेनतिर्यग्मूलान्युच्यते।तिर्यगामनस्वभा
वत्वेनवायुनैवकेषांचिद्भुवनानामवष्टब्धत्वात॥इत्थंभूतानिपद्मानितस्यांशिलायांततःसंतीत्यन्वयः॥ ॥

नि॰म॰
३८

38

तेषामिति॥तेषां च पद्मानां निकटे शतसहस्रशः संखाः संति॥शंखशब्देन नक्षत्रग्रहताराद्रूपाणि ज्योतिर्मंडलान्युच्यंते॥समुद्रवन्नीलेनभसि
शंखसंघकस्य समानत्वात॥चक्रशब्देन मंडलाकाराणि द्वीपानि तेषां चक्रधारावद्वभासमानैः समुद्रैरुपलक्षितत्वात।घिदिति यनत्वैकात्म
त्वादि विषयात॥घनत्वं निविडत्वं॥एकात्मकत्वमेकरूपत्वं॥आदिशब्दाद्यौरित्यादीनि तद्गमातत्सामर्थ्यादिषा चितशिलेव तत्तद्दशला।र॥

तेषांच निकटे संति शंखाः शतसहस्रशः॥चक्रौघाश्च महाकाराः पद्मवत्सन्निवेशिनः॥ श्रीराम उवाच॥ ॥सत्यमेतन्मयाद्र
ष्टा ताहृशी सा महाशिला॥शालग्रामे हरेर्मूर्भि विंध्यनेतादृशी शिला॥ ॥वशिष्ठ उवाच॥ ॥चिद्धिलेषा मयोक्ता तस्याम
तर्जगत्स्थितिः॥घनत्वैकात्मकत्वादि वयादेषाचिलेव चित॥अप्यत्यन्तघनां गात्या स्तुनीरंध्रा कृतेरपि।विद्यतेंतर्जग
गद्वंदं व्योम्नीव विपुलानिलः॥द्यौःक्ष्मावायुराकाशं पर्वताः सरितो दिशः॥संनिलस्यां शिलासा च सुषिरा न मनागपि
९
अपीति घनायां निरंध्रा अपीतस्याः शिलायां अन्तः द्वंद्वं विद्यते।जगद्द्वंद्वस्य तदभिन्नत्वेन घनत्वनीरंध्रत्वयोर्विरोधाभावात
द्यौरिति॥सा च मनागपि सुखिरा सरंध्रा न भवति॥क्ष्माप्रभृतीनां तदभिन्नत्वात॥ ॥९॥ ॥

एम
३८

शंखेति। शंखपद्मादिलेखनेपि पाषाणप्रस्थानं किंविद्रूपं घटेते तथा भूतं भवद्विषयद्रूपापि चित्राः शिलामशीलं भंजिकावद्बहुविधविचित्रविचित्रिताश्चे
ति खिनाभिप्रेतद्रव्यर्थाः। उपलइति। यथा अंतःसन्निवेशः अंतःस्थितः शंखपद्मादिः शोभितविशउपलो नानात्मकः तथा प्रतीयमानोपि
वस्तुत एकपिंडकस्तथा चितः सर्गोपि जगद्भिन्नोपि एकपिंडतां न मुंचति। यथोनि। शिलायां कल्पितः पद्मः तद्वपुर्मयः। शिला

शंखपद्मादिकं लोकपाषाणे लिख्यते तथा॥ भूतं भवद्विषयद्विचित्रं शिलाशालभंजिका॥ उपलोन्तःसन्निवेशो नानात्मापि एक
पिंडतां। तथा चिद्विसर्गोपि न मुंचत्येकपिंडतां॥ यथा पद्मः शिलाकोशादभिन्नस्तद्वपुर्मयः। तथा सर्गश्चितो रूपा
दभिन्नः सर्वदैव हि॥ शिलान्तः पद्मलेखालामरीचान्तश्चमत्कृतिः। नोदेति नास्तिमायाति यथा सर्गास्तथा चितौ॥ १२॥

पृथक् शिलाकोशाद्यथात्र भिन्नः तथा चितिकल्पितः सर्गोपि चिद्रूपादभिन्नः। शिलेति। शिलायां कल्पिता पद्मलेखालीम
रीचान्तश्चमत्कृतिवत्स्वांतस्थिता चमत्कारहेतुः कौतुकरसस्फूर्तिश्च यथा नोदेति स्वाभाविकत्वात्। नास्तमाया
ति। यावद्द्रव्यमविनाशात्। तथा चितौ सर्गोपि स्थिति॥ ४॥

नि०त्र ३९

39

यथेति। पुरंध्रीणां गुर्विणीनां मत्स्योदरगर्भरूपो यथांतर्वर्त्तते॥ मज्जा सारभूतो शो यथा विल्वगा विल्वफलांतर्गतावर्त्तते। तथैवब्रह्मानंदवि
कारा द्या ब्रह्मांडमंडली चिता वंतेनवर्त्तते॥ सुषुप्तेति॥ चक्रमयरूपाःलेखाः॥ शिलोदरे यथा सुषुप्तावस्थया सुषुप्तवन्निश्चला
वस्थया स्थिता। इयं जगदावली वा चितेरंतस्तथैव सुषुप्तावस्थया स्थिता॥ यथेति॥ सन्मात्मकं ब्रह्म यत्र यस्मिन्देशे यदा

यथा पुरंध्रीगर्भो त्तर्भ मज्जा वा विल्वगा यथा॥ तथा ऽनन्तविकाराढ्या चितौ ब्रह्मांडमंडले॥ सुषुप्तावस्थया चक्र
पद्मलेखा शिलोदरे। यथा स्थिता स्थिते नेत्तं स्थितेयं जगदावली॥ यथा यत्र यदाकारं तथा तत्र तदेव हि। ब्रह्म
सर्वात्मिकं सर्वं सुषुप्तस्थमिव स्थितं॥ भूरिभावविकाराढ्योऽप्ययं जगदुपक्रमः॥ सुषुप्तमेव तद्विद्धि शिला
तस्थांकजादिवत्॥ १६॥

कारं यद्रूपं सत्यथा वर्त्तते। तत्र तदेव वस्तु तथा तेनैव प्रकारेणोपलक्षितं भवति॥ अतः सर्वं ब्रह्मैव सुषुप्तमिव सु
खुप्तावस्थापन्नमिव निर्विकारं स्थितं ब्रह्मणः सर्वात्मकत्वात्स्वात्मसंकल्पत्वाद्वा। स्वसंकल्पानुसारोरणानां ना
रूपतया वस्थानं युक्तमिति भावः॥ भूरीति भवि विकारैर्जन्मादिभिराढ्योप्ययं जगद्रूपः उपक्रमस्तच्छिलान्तःपक्वजा
तदिवत्सुषुप्तं सैव विद्धि॥ राम ३९

नित्यमिति प्रशान्ते समे विहूने वात्मनि इदं दृक्प्रतीयमानो जगद्विलासः शिलांतः पद्ममिव सुषुप्तपदमेव ब्रह्मणः सुषुप्तावस्थ्यावस्थाने
मेव दृष्टानुसर्गादिशाः सर्गादिवस्थाः असारा निष्प्रमाणाः अतः कदाचिदेव देहे वा स्वस्वरूपं मोपयांति। इति वासिष्ठविवरणे।

नित्यसुषुप्तपदमेकजगद्विलासः सम्यक्प्रशान्तसमविहूनआत्मनीदृक्॥ पद्मशिलांतरवसर्गदृशास्वसाराद्
दृष्टानुदेहमुपयातिकदाचिदेव॥ ५१॥ इति निर्वाणप्रकरणे शिलोपाख्यानं नाम द्वात्रिंशस्सर्गः॥ श्रीरामउवा
च ज्ञातंज्ञातव्यमाविलं दृष्टंद्रष्टव्यमद्भुतं॥ लीलयेदं तु पृच्छामि भूयो बोधाभिवृद्धये॥ १॥ जगत्सहस्रनि
र्म्माणमहिम्नो दर्प्पणस्य तु॥ पुर्यष्टकस्य भगवन्रूपं कथय कीदृशं॥ २॥

ख्यानं नाम द्वात्रिंशः सर्गः॥ पूर्वं विचित्रा अपारखंडैकरसचिच्छिलात्वेन निरूपिता॥ इदानीं तु सर्वं ब्रह्मेति विवेकिनो युद्धादि
रपि चित्तविश्रांतिबाधको न भवतीति दर्शयितुं अर्ज्जुनाख्यायिकावतार्यन्ते॥ जगदिति॥ जगतां सहस्रस्य निर्म्माणं
महिमा यस्य तस्य दर्प्पणस्येव निर्मलस्य पुर्यष्टकस्य रूपं कीदृशं कथय॥

नि॰प्र॰ ४० अनाद्यंतमिति। श्लोकत्रयं वाक्यं। जगद्बीजं ब्रह्मैव कल्पनायुक्तमविद्यायुक्तं सत् जीव इति स्मृतः। नु जीवस्य वसुनः कलामाय तेन स्पाःक
लनं ग्रासस्तेन वर्जितं यं स्वयमेवाद्वितीयो नुखतां यातो गतं अत्र चिन्मात्रात्मस्वरूपविस्मारणाजाते अहंभावा देहमित्यभिमाना
दहंकारः स्मृतः। मननात् संकल्पादिरूपात् मन उच्यते। बोधस्य निश्चयरूपाद्व्यापाराद्बुद्धिरुच्यते तथा इंद्रदृष्टेः इंद्र आत्मा तेन
दृष्टत्वात् तत्कर्मोपार्जितत्वादिंद्रियमुच्यते। इंद्रियमिंद्रलिंगमिंद्रदृष्टमित्यादिना सूत्रेणेंद्रियशब्दस्य इंद्रदृष्टमित्यर्थे निपाति
तत्वात्। देहरूपभावनया देहो भवति। घटाकारभावनया घटो भवति। एवं स्वभावात्मा एवंप्रकारस्वाभाव स्वभावस्वरूपए

वशिष्ठ उवाच अनाद्यन्तं जगद्बीजं ब्रह्मास्ति निरामयं। तदेव कलनायुक्तमत्र जीव इति स्मृतः॥ नारूपं शुद्ध
चिन्मात्रं कलाकलनवर्जितं। कलनोन्मुखतां यातमत्र जीव इति स्मृतः॥ स जीवः खलु देहेऽस्मिंश्चिनोति स्पंदते स्फु
ट। अहंभावादहंकारो मननान्मन उच्यते॥ बोधनिश्चयतो बुद्धिरिंद्रदृष्टेस्तथेंद्रियं। देहभावनया देहो घटभावनया घटः
। एषा ह्येवं स्वभावात्मा जनैः पुर्यष्टकं स्मृतं॥ कर्तृत्वकर्तृत्वभोक्तृत्वसाक्षित्वाद्यभिपातिनी॥ यासौ विज्जीव इत्युक्ता
न तद्विपुर्यष्टकं विदुः॥

दात्मा तज्ज्ञैः जनैः पुर्यष्टकमिति स्मृतः तल्लक्षणांत अहंकारकलायुक्तं बुद्धिबीजसमंचितं। तत्पुर्यष्टकमित्युक्तं भूतहृत्पद्मषट्पद राम
मितिप्रश्ने मुक्तं। इदानीं प्रकारांतरेण लक्षणमाह॥ कर्तृत्वेति॥ तात्वक कर्तृत्व भोक्तृत्व साक्षित्वाद्यभिपातिनी अहं कर्ताहं भोक्ताहं स ४०
इ अहं इत्याभिमानवती यासौ संविज्जीव इत्युक्ता। तदेव संवित्स्वरूपं पुर्यष्टकं विदुः। अंतःकरणशरीरप्रतिबिंबिता कर्तृत्वभोक्तृ
त्वाद्यभिमानवती संविदेव जीवः पुर्यष्टकं वेत्यर्थः॥

पुर्यष्टकेति ॥ यथा जनाः पुर्यष्टकवशेनैव स्वभ्रमात्स्वप्नांतरमसत्यमेव पश्यंति । तद्वदिदं जगदपि पश्यंति । इत्थं स्वप्नवत्तत्र पंचस्व
प्नि ध्यात्वं निस्थित्यार्जुनवद् भगेन भवहर्तव्यमिति तत्कथां प्राप्स्यतीति पुंडरीकाक्षेत्यादिनाथ यम इति श्लोकद्वयं वाक्यं भगवान्

पुर्यष्टकवशेनैव स्वभ्रमात्स्वप्नांतरं यथा ॥ असत्यमेव पश्यंति जनाः तद्वदिदं जगत् ॥ वसिष्ठ उवाच ॥ पुंडरीकाक्ष निर्दिष्टा मम
सक्तिमतिं शुभां ॥ यामालिंग्य महाबाहो जीवन्मुक्तमना भव ति ॥ पांडोः सुतोऽर्जुनो नाम सुखं जीवितमात्मनः ॥ रूपयिष्य
ति निर्दुःखं तथा रूपय जीवितं ॥ श्रीराम उवाच ॥ भविष्यति कदा ब्रह्मन् सोऽर्जुनः पांडुनंदनः ॥ कीदृशीं वहरिस्तस्य कथयि
ष्यत्यसक्तता ॥ वसिष्ठ उवाच ॥ यमः कदाचिद्भगवान्गते प्रति चतुर्युगे तपः प्रकुरुते व्रतदलनात्पापशंकया ॥ क
दाचिदष्टौ वर्षाणि दश द्वादश वापि च कदाचित्पंच सप्तापि कदाचित्षोडशापि च ॥ उदासीनवदासीने तस्मिन्नियमसं
स्थिते ॥ नहि नश्यंति जगज्जाले भूतानि कानिचित् ॥ १२ ॥ ॥ ॥

मः किल गतेषु चतुर्युगेषु कदाचिद्व्रतद्रोहात्पापमाशंकमानस्तन्निवृत्तये तपश्चरत्कदाचित् अष्टौ वर्षाणि तपः कुरुते क
दाचिद्दश कदाचिद्द्वादश कदाचित्पंच कदाचित्सप्त कदाचित्षोडश वर्षाणि इत्येवं बहुवारं बहुधा तपः कुरुते ॥ १२ ॥ ॥

नि·प्र· तेनेति॥तेनभूमसोर्हिंसायामप्रवृत्त्याहेतुनाप्राप्तृषिमदवशात्स्वेदीकुंजरोमशकैरिवभूतलंनीरंध्रंभूतौघंसततनिःसंचारंसंचरिष्यम
४१ शक्यंभवति॥वैवस्वतइति॥श्लोकद्वयंवाक्यं॥विवस्वतःसूर्यस्यपुत्रेणापियमेनतथैवाविघ्नविघातायतथैवाविघ्नविघातायत
41 तेनस्त्रीनीरंध्रभूतौघनिःसंचारंमहीतलं॥भवतिप्राप्तृषियद्वीकुंजरोमशकैरिव॥अथतानिविचित्राणिभूतानिबहुयुक्ति
तिः॥रूपयंतिसुरारामसुवोभारनिह्नुतये॥एवंयमसहस्राणिव्यवहारशतानिच॥समतीतान्यनंतानिभूतानिव्रजगंतिच॥
वैवस्वतोनामयमोयएषपितृनायकः॥अनेनलघुनामाधोपरिक्षीणोषकेभविता॥योषघविघातायवर्षाणिद्वाद
शात्मनि॥ब्रतचर्येहकर्तव्याहत्वास्वजनकर्षणं॥तेनेयमुर्वीनीरंध्राभूतैर्मत्तैरभूद्भिः॥दीनाप्रघनगुल्मेवभारभू
तैर्भविष्यति॥भूभारपरिभूतांगीहरीशरणमेष्यति॥हरिर्द्वेहक्षयेनाथमहीमवतरिष्यति॥वसुदेवसुतस्त्वेकोवासुदेव
इतिश्रुतः॥देहोभविष्यतिहरेर्द्वितीयःपांडुनंदनः॥धृतराष्ट्रसुतैःसार्धंसंग्रामेऽत्यन्तदारुणे॥उपेष्यत्यर्जुनेनैतयोर्द्वंगु
तद्वंधवोखिलाः॥अर्जुनःस्वजनान्दृष्ट्वातान्सर्वान्मरणोन्मुखान्॥विषादमेष्यत्युद्योगंयुद्धायनकरिष्यति॥तम
र्गुनाभिधांदेहंप्राप्यकार्यैकसिद्धये॥हरिर्द्वितीयेनदेहेनबोधयिष्यतियुक्तिभिः॥ ॥२३॥ ॥ ॥ राम ४१
थैवद्वादशवर्षाणि॥ह्रास्वजनकर्षणा॥हरपरिहृतजनमारणा॥ब्रतचर्यातपश्चर्याकर्तव्या॥तेनेति॥प्रघनगुल्मा॥प्रघनानिरं
तप्रगल्भास्तंवायस्यां॥सतथा॥तमिति॥उद्देनदेहेनबोधवताकृष्णावतारस्वरूपेण॥ ॥ ॥रामायनमः॥ ॥

अनंतमिति। राजसिंहेति शोकवैक्लव्यनिरासाय संबोधनं देहादिव्यतिरिक्तमनंतादिलक्षणमात्मानमेवावलोकय विचारय। यतस्त्वमजोसि अत एव नित्योसि निरामयोसि। तत्र संविद्घुःस्फारसि त्वमेकं पदं संविद्रूपेणाव पुषास्फारमभिव्यक्तं व्याप्तमित्यर्थः नेति। अयं देहादिव्यतिरिक्त आत्मा कदाचिदपि न जायते म्रियते मृयते वा जननमरणे येद्दिहक्षम्मेलाति॥ अयमात्मा भूत्वा भवनक्रियामनुभूय भूयः पुनर्भविता भवनक्रियारहितो न भवति। अयमात्मा न भूत्वा भवनरहितः पुनर्भविता वा न भवतीत्युभयथापि योजनीयं॥ यतोयं भूत्वा पुनर्न्यदादिव च न भविता न पुनः अतो न म्रियते यन्न वा पूर्वं न भूत्वा

श्रीभगवानुवाच अनन्तमव्यक्तमनादिमध्यमात्मानमालोकय राजसिंह॥ संविद्घुःस्फारमलब्धदोषमजोसि नित्योसि निरामयोसि॥ न जायते म्रियते वा कदाचिन्नायं भूत्वा भविता वा न भूयः॥ अजो नित्यः शाश्वतोऽयं पुराणो न हन्यते हन्यमाने शरीरे॥ योगस्थः कुरु कर्माणि संगं त्यक्त्वा धनंजय। ब्रह्मार्पितसमाचारो ब्रह्मैवासि क्षणात्॥२५॥

न पुनः कालान्तरभविता वा न भवति। अतो न जायत इत्युक्तार्थोपपादनं। इत्यमजो नित्यश्च नित्यशब्देन कदाचित्सत्तारूपोपि विकारो निरस्यते। शाश्वतः अपक्षयरहितः पुराणः वृद्धिरहितः। नूतनेहि वसु वर्द्धते। अयमात्मा शरीरे हन्यमाने विपरिणम्यमानेपि स्वयं न हन्यते न विपरीणम्यते इति षड्भावविकाररहित्यमुक्तं। योगस्थ इति। सिद्ध्यसिद्ध्योः समत्वं योगः तन्निष्ठः सन् संगं स्वरो मेतुष्ठास्त्वि तापि फलाकांक्षां त्यक्त्वा कर्माणि ईश्वराराधनार्थं कुरु इत्यपेब्रह्मार्पितसमाचारः ब्रह्मार्पितसत्कं ब्रह्मैव भवसि॥ श्रीमहादेवाउवाचा॥ श्रीरामरामराम॥

ईश्वरेति। ईश्वरार्पितसर्वार्थः ईश्वरार्पिताः सर्व्वे अर्थाः शुभाशुभरूपा येन तादृशः सन्नीश्वरात्मा ईश्वरे अर्पित आत्मा येन तथाभूतश्च संनिरामयः स
र्वभूतात्मा भूषितभूतलः ईश्वरो भव॥ सन्यस्तेति। संन्यासयोगयुक्तात्मा कर्मफलत्यागः संन्यासयोगः सर्वेति। सर्व्वेषां संकल्पानां संश।

ईश्वरार्पितसर्वार्थ ईश्वरात्मा निरामयः॥ ईश्वरः सर्व्वभूतात्मा भव भूषितभूतलः॥ संन्यस्तसर्वसंकल्पः समः शांतमना मुनिः। संन्या
संन्यासयोगयुक्तात्मा कुर्वन्मुक्तमतिर्भव॥ अर्ज्जुन उवाच॥ संगत्यागस्य भगवंस्तथा ब्रह्मार्पणस्य च। ईश्वरार्पणरूपस्य संन्या
सस्य च सस्य च सर्व्वशः। तथा ज्ञानस्य योगस्य विभागः कीदृशः प्रभो। क्रमेण कथयेतन्मे महामोहनिवृत्तये॥ श्रीभगवानुवाच
॥ सर्व्वसंकल्पसंशांतो प्रशांतघनवासनं॥ न किंचिद्भावनाकारं तद्ब्रह्म परमं विदुः॥ तंद्रुघोगं विदुर्ज्ञानं योगं च कृतबुद्धयः॥ हि ब्रह्मस
र्वं जगदहं चेति ब्रह्मार्पणं विदुः॥ कर्म्मणां यः फलत्यागस्तं संन्यासं विदुर्बुधाः॥ त्यागं संकल्पजालानाम संगं इति कथ्यते॥ ॥

ते घनवासनं निर्व्वासनश्च न किंचिद्भावनाकारं न विघते किंचिद्भावनाकारं न विघते किंचिदपि भावनायोग्यं रूपं यस्य तादृशं किंचिद्बुद्धं विन्म
ज्ञेयं दृश्यं तदेव परं ब्रह्म विदुः॥ तदिति॥ तदर्थं सुघोगं तद्रुघोगं॥ ॥ १ २ ३

समस्तेति। समस्तकलनाजालस्य सर्वस्यापि संकल्पविकल्पजालस्य गलितद्वैतनिर्भासंभेदानभासरहितं यथा तथा ईश्वरैकत्वभावनं ईश्व
एव सर्वांतर्यामीतथा तथा प्रवर्तयति तद्विलासोयं सर्वो व्यवहार इति यत् तन्मयत्वभावनं एतदेव सर्वव्यवहारस्य तन्निवेदनमेव ईश्वरार्पणं मन्म
ना इति॥ एवमनेन प्रकारेण आत्मानं चित्तं युक्त्वा मयि संयोज्य मत्परायणः मत्परः सन् मामेवैष्यसि॥ सामान्यमिति श्लोकचतुष्टयं वाक्यं

समस्तकलनाजालस्येश्वरैकत्वभावनं॥ गलितद्वैतनिर्भासमेतदेवेश्वरार्पणं॥ मन्मना भव मद्भक्तो मद्याजी मां नमस्कुरु॥ मामेवै
ष्यसि युक्त्वैवमात्मानं मत्परायणः॥ सामान्यं परमं चेति द्वे रूपे विद्धि मेऽनघ॥ पाणिपादादियुक्तं सामान्यं शंखचक्रगदाधरं॥ परं रूप
मनाद्यंतं यन्ममैकमनामयं॥ ब्रह्मात्मपरमात्मादिशब्दैनैतदुदीर्यते॥ यावदप्रतिबद्धस्त्वमनात्मज्ञतया स्थितः॥ तावच्चतु
र्भुजाकारं देवपूजापरो भव॥ तत्क्रमात्संप्रबुद्धस्त्वं ततो ज्ञास्य॥ सितत्परं॥ मम रूपमनाद्यंतं येन भूयो न जायसे ३५ ॥ ॥

साकारं निराकारं च मद्द्वे रूपे तत्राप्रबुद्धदशायां शंखचक्रगदापद्मधराकारं रूपं उपास्यं॥ तदुपासनया च क्रमात् चित्तशुद्धिद्वारा च पर
ब्रह्मरूपं द्वितीयं रूपं ज्ञानं वेकल्पपर्यवसितं सिध्यतीत्यर्थः॥ ॥ ॥ श्रीरामायनमः॥ ॥ ३॥ ॥ ॥

निर्मानेति।निर्म्मानमोहाः मानोभिमानोहंकारइतियावत्।।मोहस्तन्निमित्तमज्ञानं ताभ्यां निष्क्रान्ताजितःसंगदोषोयैस्तेअध्यात्म
नित्या आत्मानुसंधाननिरताः अतएवविनिवृत्तकामाः सुखदुःखसंज्ञैर्द्वंद्वैर्विमुक्ताअमूढाविद्वांसः तत्पदंगच्छंतिद्वंद्वानुसंधानरहि
तःनित्यंसत्वगुणनिष्ठोनिर्योगक्षेमः इष्टानिष्टप्राप्तिपरिहारयोउदासीनःआत्मवान्अप्रमत्तचित्तश्चत्वंयथाप्राप्तमनुवर्त्तमानो

निर्म्मानमोहाजितसंगदोषाअध्यात्मनित्याविनिवृत्तकामाः द्वंद्वैर्विमुक्ताःसुखदुःखसंज्ञैर्गच्छंत्यमूढाःपदमव्ययंतत् य
स्यसर्वेसमारंभाःकामसंकल्पवर्जिताः ज्ञानाग्निदग्धकर्म्माणंतमाहुःपंडितंबुधाः।।निर्द्वंद्वोनित्यसत्वस्थोनिर्योगक्षेम
आत्मवान् यथाप्राप्तानुवर्त्तीचभवभूषितभूतल।।अपिस्फुटतिविंध्याद्रौवातिवाप्रलयानिले।।युक्तशास्त्रानुगोमार्गः
परित्याज्योनधीमता।।अज्ञानादात्मनःसाधोसत्तामायातिवासना।।आत्मज्ञानेमहावाधाद्विलयंयातिवासना।।इतिग
दितवतित्रिलोकनाथेद्रुणमिवमौनमुपस्थितेपुरस्तात्।।अथमधुपइवासिताब्जखंडेवचनमुपेक्ष्यतितत्रपांडुपुत्रः।।४४।।

भूषितभूतलोभव।भूतलस्यभूषणंभूयाः अपीतिमहत्यामप्यापदियुक्तपरिष्टः।।शास्त्रमार्गोधीमतानपरित्याज्यः।इतीतिवचनमुपेक्ष्यतिव
रुतीत्यर्थः।। ।।

परीति॥ दिनपद्मिना अब्जिनीव त्रिलोकभर्तुस्तव वचनेन परिबोधिता मतिः परिगलितसमस्तशोकभारा सती परम्सुदयं प्रकाशं गत॥ ॥
इति वासिष्ठविवरणे निर्वाणप्रकरणे अर्जुनोपाख्यानं नाम त्रयस्त्रिंशः सर्गः॥ तत्पूर्वं विवेकितो युद्धादिरपि चित्त विश्रान्तिबाधको नेति दर्शयितुमर्जुनाख्यायिका वर्णिता॥ इदानीमेषा जन्मपरंपरा स्वसंकल्पतपश्चात्तिपरंपरामात्रसिद्धेति दर्शयितुं दृष्टांततया

अर्जुन उवाच॥ परिगलितसमस्तशोकभारा परम्सुदयं भगवन्मतिर्गतिर्यं॥ ममतवचनेन लोकभर्तुर्दिनपतिना परिबोधिताऽब्जिनीव॥ ॥ इति निर्वाणप्रकरणेऽर्जुनोपाख्यानं नाम त्रयस्त्रिंशः सर्गः॥ ॥ वशिष्ठ उवाच॥ अथ राघव वक्ष्ये हमितिहासमिमं शृणु॥ यद्वृत्तं कस्यचिद्भिक्षोः किंचिन्मननशालिनः॥ आसीत्कश्चिन्महाभिक्षुः समाध्यभ्यासतत्परः नित्यं स्वच्छव्यवहारेण रूपयत्यखिलं दिनं॥ समाध्यभ्यासशुद्धं तत्तस्य चित्तं क्षणेन यत्॥ चिंतयत्याशु तद्भावं गच्छत्यचिरवीचितां॥ कदाचित्स समाधानविरतो तिष्ठदेकधीः॥ कंचित्सं चिंतयामास स्वासनस्थः क्रियाक्रमं॥ ॥

शांत उपाख्यायिका निरूप्यते॥ आसीदिति॥ महाभिक्षुः महान्परिव्राट् स्वच्छव्यवहारेण समाध्यभ्यासप्रवृत्तिना॥ समाधीति॥ समाध्यभ्यासेन शुद्धं निर्मलं तस्य भिक्षोश्चित्तं यच्चिंतयति भावयति॥ आशु तस्य वस्तुनो भावं स्वरूपं गच्छति॥ तद्रूपं भवति॥ अचिरवीचितामिव॥ कदाचिदिति॥ समाधानविरतः समाधेरुत्थितः क्रियाक्रमं व्यवहारप्रकारं॥

नि॰ ४८
४४

तस्येति। चिंतयतस्तस्य लीलार्थं विनोदानार्थं सामान्यजनप्रवृत्तितां सामान्यजनः साधारणजनः पामरजन इत्यर्थः॥ तद्वृत्तां नं भावयामीति॥ स्वत एव वेयं प्रतिभा प्रतिज्ञा विशेषो जातः॥ इतीति पूर्वोक्तप्रकारेण संचिंत्य तस्य चेतस्तदा चिंतानुसारेण नरानरं रूपत्वाभ्यर मभूत॥ तथाहि॥ चेतश्चिंतावशात्स्पंदसंस्थानसंत्यागमात्रेणा स्पंदस्य जनं संस्थानसंत्यागः पूर्वसंनिवेशत्यागः पूर्व

तस्य चिंतयतो जाता प्रतिभेयमिति स्वतः॥ भावयाम्यास्तु लीलार्थं सामान्यजनवृत्तितां॥ ॥ इति संचिंत्य चेतोस्य स्थितं किंचिन्नरांतरं॥ स्पंदसंस्थानं सत्यागमात्रेणावर्त्तते श्विवा॥ तेन चिंतानरेणाथ कृतं नामात्मवांछया॥ जीवटोस्मीति सहसाकाकतालीयवांछितं॥ ॥ ॥

वासनात्याग इत्यर्थः॥ तन्मात्रेणावर्त्तते रूपांतरं प्रतिपद्यते॥ अब्धिवयं यथाहि जलं वायुवशाच्चलितं सत् पूर्वसंस्थानत्यागेन तरंगादि रूपतामापद्यते॥ तद्वत॥ तेन चिंतानरेण चिताकल्पितपुरुषेण स्वयमेवास्मीति जीवटोस्मीति काकतालीयवांछितं यदृच्छयाभिमतं न पुनरभिजनविद्यावृत्तादिना प्राप्तं नामकृतं। स्वेनैव काधिरस्तु त्यन्नामसंज्ञाकल्पिते त्यर्थः॥ ॥ ४४

45

जीवद्दत्तादिद्वाद्दशमिह जीवदत्तप्रभृति चतुष्पर्यंताभिज्ञोः स्वप्नापर पर्यायाः जीवदत्तः स्वप्ने पाठानुष्ठानष्टिमत् वेदशास्त्रपाठेन तद्गुक्ताचरणेन च तुष्टिमत्
कृतं कृतं प्रतिभामात्रेणैव संपन्नं विप्रत्वं ददर्श ॥ विन्नेदेशान्तराण्यिवत ॥ तथा हि ॥ विन्ने देशाद्देशान्तरमापद्यते तद्वत् ॥ सच द्विजश्रेष्ठं कदाचिद्दह

जीवदत्तो विजहाराथ स्वस्वप्नपुंनुषष्ठिरं ॥ स्वप्न निर्माणनगरेकस्मिन्स्वित्पुरवीथिषु ॥ तत्र पानं पपौ मत्तो मद्दनिद्रामवापच ॥ स्व
प्रेददर्शविप्रत्वं पाठानुष्ठानतुष्टिमत् ॥ प्रतिभामात्रसंपन्नं विन्ने देशांतराण्यिवत ॥ कदाचित्स द्विजश्रेष्ठः स्वकृहव्यापारनि
ष्ठया ॥ सुषुप्तापान्नर्यवहतिवीजावस्थाभिवद्भुमः ॥ द्विजो पश्यपस्त्वयं स्वप्ने सामंतत्वमथात्मनि ॥ सभामत्रः कृताहारः
कदाचिद्दिनिद्रया ॥ आपश्यद्राजतां स्वप्नेककुवलयपालिनीं ॥ स कदाचिन्नृपस्वस्थस्सुषुप्तामस्तामिते हितः ॥ अ
पश्यत्त्वात्मनि स्वप्ने सुरस्त्रीत्वमनिंदितं ॥ १३ ॥

र्व्यापारनिष्ठया दिवसव्यापारतरेणास्तो निद्रहेतुनाबीजरूपतापादस्व इव निद्रामागतः स्वप्ने आत्मनिपताकायुक्तहस्त्यश्वादिमिनयेवज
लद्दमालयायुक्तं सामंतत्वं मंडलेश्वरत्वमपश्यत् स च सामंतः स्वप्ने कुवलयपालिनीं विलदिग्मंडलपालनसमर्थां राजतां च
क्रवर्त्तितामपश्यत् स च नृपः सुनस्त्रीत्वं ॥

वा॰ सा च सुरस्त्री मृगीत्वं तत्तिर्यंचोपीत्यर्थांतरन्यासः। यतो दृष्टानां श्रुतानां च चेतोहृतमनुपहतं स्मरणात्स्मृतिः। ततो हेतोः संस्कारवशात्। ति
४५ र्यंचोपि स्वप्नं पश्यंति। सा च लता वनदेवानां वनक्रीडासु लतागृहवत्। विलसंतीव भूत्वा सा च लता वीजांतस्थांकुराकारसमज्ञेयाधिरूढ
याप श्यन्ति। सा च लता वनदेवानां वधीजांतर्गतस्थांकुरस्य य आकारः तत्समेन निगूढेन ज्ञेयवमुना अधिरूढया आश्रितया अंतःसं

सा सुरस्त्री रतिः श्रांता निद्रां गाढामुपागता॥ अपश्यदात्मनि स्वप्ने मृगीत्वमतिचंचलं॥ सा मृगी लोलनयना कदाचिनिद्र
यायुता॥ स्वाप्नेऽदर्शद्वल्लीत्वं स्वात्मना साऽऽरूढमात्मनि। तिर्यंचोपि प्रपश्यंति स्वप्नं चित्ते स्वभावतः॥ दृष्टानां च श्रुतानां च
चेतः स्मरणमद्भुतं॥ सा च भूद्वल्लता पुष्पफलपल्लवशालिनी॥ वनदेवीवनक्रीडालतागृहविलासिनी॥ वीजांत
ःस्थांकुराकारसमंज्ञेयमज्ञेयेनाधिरूढया॥ सा पश्यदंतःसंवित्या स्फुलंलवनमात्मनः॥ कंचित्कालं सुषुप्तस्थक
लया जडताघनं॥ अनुभूय प्रहृदर्शात्यस्वात्मानं भ्रमरोस्थिरं॥

त्या आत्मनो लतादेहाधीरिणो लंवनं लताभावो चितं हृष्टा दौका चितेलं गगनमपश्यदिति लतायाः जाग्रद्दशा दर्शिता॥ अथ रा॰
सैव लता सुषुप्तस्थकलया सुषुप्तस्थस्यया दृशीकला संवितिः ताहृश्यैव कलया घनां जडतां। निद्रारूपं जाड्यमनुभूय स ४५
प्रोस्वात्मानं भ्रमरस्थितं ददर्श॥

सबभ्रमरःसरोजिन्यांव्यसनीआसक्तःसन्विसनाललग्नोबभूव॥तथाहिजडमतेरपिरसानभिज्ञस्यकृमिकीटादेरपिचेतःक्वचिदेवप्रीय
क्वोरतिंयातिसचभ्रमरस्तयानलिन्यासार्द्धंगजेनचूर्ण्यमानस्तद्रूपालोकाभावनयाआत्मानमामोदहस्तितयाआमोदेनगंधविशेषेण
मत्तोयोहस्तीतद्भावेनोदितंददर्श॥सचगजःकेनचिद्राज्ञाखातगर्त्तेनिपात्यवधःशिक्षितश्च॥राजवल्लभोभूत्वाक्वचित्समरेहन्यमा

संबभूवसरोजिन्यांव्यसनीविसनाललग्नः॥क्वचिदेवरतिंयातिचेतोजडमतेरपि॥तामाजगामनलिनींपरिलोलयितुंगजः॥
रम्यवस्तुक्रियार्थैवमूढानांजृंभतेपदं॥नलिन्यासतयासार्धंतत्रचूर्णत्वमाययौ॥भ्रमरोवारणालोकाद्वारणालोकभावनाश
ददर्शात्मानमामोदमत्तहस्तितयोदितं॥शुष्कसागरगंभीरेगजःखातेपपातच॥बभूववल्लभोराज्ञोवध्वातेनाशुशिक्षितः॥क्व
चित्समरसंमर्द्देघातितोस्तमुपाययौ॥गंडस्थभ्रमराभ्यासात्तज्जोभूयोप्यभूदलिः॥पुनःकरिभराक्रांत्यापद्मिन्यांचूर्णतां
ययौ॥पार्श्वस्थहंससंवित्याबभूवकलहंसकः॥कलहंसश्चिरतरंयोनिष्वन्यासुसंभ्रवत॥यदृच्छयाकदाचिज्जातःप
द्मजसारसः॥ब्रह्मसारसतांयातोविजहारससारसः॥कदाचिद्ददर्शाथरुद्रंरुद्रपुरेखगः॥तत्रैवचिरमत्रस्यरुद्रोऽहमिति
निश्चितं॥ ॥

नोगंडस्थलगतभ्रमरभावनयापुनर्भ्रमरोभूत्ससभ्रमरःकरिपदाक्रांत्याचूर्णितःपार्श्वस्थहंससंवित्याकलहंसोबभूव॥सच
कलहंसोयोन्यंतरेषुलुठन्यदृच्छयापद्मजस्यब्रह्मणःसारसोहंजातःसचखगोहंसःकदाचिच्चब्रह्मणोरुद्रपुरेगमनेरुद्रंदृष्ट्वा
तद्भावनयारुद्रोहमितिसंस्कारवशान्निश्चितबुद्धिरभूत॥ ॥

॥

यो॰सि॰ उद्देति। तत्र उड्डपुरे उद्भूतवपुरुड्डाकारवपुः स्वयं हंसो॥ ॥ गोष्ठीविलासिभिः प्रथमपरिषत्संभूतैस्तैस्तैः प्रसिद्धैः शिवपुराचारैः उड्डलोक
४६ व्यवहारैः शिवमहात्म्यवर्णनादिभिः यथेच्छया विजहार। उड्ड इति सप्तः उड्डः अनुत्तमज्ञानविलासिन्याः सर्वोत्तमज्ञानविस्तारया तया धि
46 या प्राक्तं न पूर्वजन्मसंभूतं मशेषं तत्सुदं तत्त्वं तमपश्यदशनिरावरणो निरावरणां जन्मांतरे रथ्यावरणरहितं विज्ञानमेव वपुर्यस्य स

उड्डभूतवपुस्तत्र विजहारपुरेच्छया॥ तैस्तैः शिवपुराचारैर्गोष्ठीविलासिभिः॥ उड्डस्तनुत्तमज्ञानविलासिन्या तया ततः॥ स्वम
शेषमुदंतं तमपश्यत्प्राक्तनं तया॥ निरावरणविज्ञानवपुः स भगवान्हरः॥ भवान्स्वयमेकांते स्वस्वप्नशतविस्मितः॥ अहो नु चित्रा
मायेयं वत विश्वविमोहिनी॥ असत्येवापि सद्रूपा सुत्वल्कमतवारिवत॥ एवमत्यंतचित्रासु संसाराणपभूमिषु॥ वक्रीत्रहमिति
भ्रांतस्वप्नन्यास्विव भूरिशः॥ कस्मिंश्चिदभवं सर्गे त्विहं जीवाटनामकः॥ कस्मिंश्चिद्ब्राह्मणश्रेष्ठः कस्मिंश्चिद्वसुधाधिपः॥ हं
सः प्यभवते भुक्त्वा विंध्यकक्षे च वारणः॥ एवं योनिशतं गच्छतया तावहेमिति उड्डतां॥ ॥ ॥

भवा गवान्तहस्वस्वप्नशतविस्मितः स्वीयेन स्वप्नशतेन विस्मितः स न एकांते स्वयमेवैवमुवाच॥ अहो इति॥ अयं मायाप्रसत्यै राम
वापि मिथ्याभूतापि मतवारिवत॥ सुद्रूपासती सद्रूपा विश्वं विमोहयति। वतेति खेदे॥ एवमिति श्लोकत्रयं वाक्यं॥ अत्यंतचित्रसुसंसा ४६
राणपभूमि वक्रीषु भ्रांतोहं स्वमनोमात्रकल्पनादनेकेषु सर्गेषु जीवरादिरूपेण योनिशतं गच्छन्निति देहानां उड्डतां याततः॥ ॥

अत्रेति॥श्लोकत्रयं वाक्यं॥असौउद्धः अक्षन्मांतरेषुसवर्षसहस्रादिरूपोऽत्ययान्काले गतः तस्मात्तांस्तान्नानारूपान्स्वसंसारानुत्य
यगत्वा आलोकयामि॥ तेष्वप्यसम्यगालोकयामि॥ तेष्वप्यसम्यगालोकदानेनसम्यग्ज्ञानप्रदानेनतन्मयासहएकीकरोमि॥एवंसं
चिंत्ययत्रसर्गेभिक्षुर्विहारस्थः मठेस्थिताविहरंतस्मिन्भिक्षुवइतिविहारोमठउच्यतेसुषुप्तः सिवववदास्ते॥तंसर्गंप्रजगामावोधइत्वेति॥

अत्रवर्षसहस्राणिचतुर्युगशतानिच॥समतीतान्यनंतानिदिनान्युचरितानिच॥तांस्तान्सर्वाद्यसंसारानुत्यायालोकयाम्य
हं॥सम्यगालोकदानेनतम्यएवकरोम्यहं॥इतिसंचिंत्यउद्धोसौतंसर्गंप्रजगामह॥यत्रभिक्षुर्विहारस्थःसुप्तःशवइवास्थि
तः॥वोधयित्वाथतंभिक्षुंचेतसाचेतनेनच॥योजयामाससंस्मारभिक्षुस्वात्मनोभ्रमं॥उद्धमात्मानमालोक्यजीवटादिमयं
तथा॥वोधादविस्मयार्होपिसभिक्षुर्विस्मय

अथ॥तंभिक्षुंवोधयित्वाप्रवोध्यचेतसाचिन्नेनचेतनेनज्ञानेनचयोजयामासभिक्षुरप्यात्मनोभ्रमंसंस्मार॥उद्धमिति॥सभिक्षुरात्मानं
उद्धमालोक्यतथाजीवटादिमयंचआत्मानमालोक्यवोधात्परमार्थविगमात्॥अविस्मयार्होपिमायायामहिम्नाविस्मययया

यो॰ गी॰ ६ अथेत्यादि। अथरुद्रेणाभिकुवजीवगादीनामपिप्रबोधनेसतितेसर्वेपिरुद्रवद्दिव्यज्ञानतयारुद्रांशाःसंतोविरेजिरेततोभि
४७ क्षोर्जन्मशतोपभोगप्रारब्धशेषमनुसंधायपरमार्थरुद्रेप्रेषिताःसंतोजीवटादिसंक्रान्तरुद्रांशास्स्वंस्वमालयंप्रापुःरुद्र
47

अथरुद्रस्तथाभिक्षुर्द्वविबोत्थाययगमतुः। कापिजीवटसंसारंचिराकाशैककोणगंतंप्रबोध्याभियोज्याशुस्वेत

साचेतनेनच। बोधयंतस्त्रयोप्यासन्विस्मिताश्चाथविस्मिता॥ एकत्रपात्रित्रपात्तेरुद्रभिक्षुकजीवटाः जग्मुर्विप्रा

दिसंसारांस्तैश्चसंमिलितास्तथा। दिव्यज्ञानाविर्भूतास्तेरुद्रांशाःशतमुत्तमं॥ रुद्रेणप्रेषितासर्वेतिप्रतिस्वंस्वमालयं

॥तेनरुद्रेणतांमायामवलोक्यतथोदितं॥ स्वांशास्तामेवसंसारस्थितिसंप्रेषितापुनः॥ प्रययुःस्वास्पदंतेपि एम ४७

जीवटब्राह्मणादयः स्वकलत्रैस्समंदेहंरूपइत्वाथकालतः॥ ततोरुद्रेणसंगत्याविविशुस्तत्परंपदं॥ ॥ ॥

णोतस्यानानांचबहुत्वात्॥ स्वंस्वमितिवीप्सयानिर्देशः तेपिजीवटब्राह्मणादयःस्वंस्वमास्पदंप्राप्यस्वकलत्रादिभिःसहस्थि

त्वादेहांतेरुद्रमाप्रुवन्नितिश्लोकपंचकार्थः॥ ॥

सर्व्वमिति। चितः कोशे कोशवत्सर्व्वस्तुनिधौ स्वरूपे सर्व्वं वस्त्वस्ति अतः सर्व्वात्मत्वादसौ चित्तया तेन प्रकारेण तदात्मकं तद्रूपं सत् सर्व्वका
ले विद्यते। सर्व्वस्यापि संविद्विवर्त्तत्वात्॥ यदि विद्यते तर्हि तस्यानुसंधानेन कथन प्राप्यत इत्यत्राह। संकल्पेति। संकल्पस्य प्र
गां संकल्पगतं वस्तु यया दशया प्राप्यते सैवासिद्ध दशा अभ्यासयोगाभ्यां वायुनिरोधेन च विना न लभ्यते॥ येषामिति॥ येषां

वसिष्ठ उवाच सर्व्वमस्ति चितः कोशे यद्यथालोकयत्यसौ। चिंतयानदवाप्नोति सर्व्वात्मत्वादसंशयं॥ यत्स्वप्ने द
श्यते यच्च संकल्पैस्व लोक्यते। तत्तथा विद्यते तत्र सर्व्वकालं तदात्मकं॥ संकल्पस्य प्रगां वस्तु यया च दशया प्यते
॥ परमभ्यासयोगाभ्यां विनात्वेतन्न लभ्यते॥ येषां तु योगविज्ञानदृष्टयः पाल्लिताः स्थिताः॥ सर्व्वं सर्व्वत्र पश्यं
ति त एते शंकरादयः॥ सर्व्वं ह्यभिमतं कार्य्यमेकनिष्ठस्य सिध्यति॥ दक्षिणां ककुभं पश्यन्न कश्चित्प्राप्नोत्युत्तरां
दिशं॥

त्तु सिद्धानां योगविज्ञानदृष्टयः योगः समाधिविज्ञानमध्यात्मशास्त्रज्ञानं॥ तज्जन्या दृष्टयो दर्शनानि फलिताः फलवत्य
ः स्थिताः। एते शंकरादयः। स्वसंकल्पानुमारेण सर्व्ववस्तु सर्व्वत्र देशे काले च पश्यन्ति॥ सर्व्वमिति। अभिमतं सर्व्वका
र्यमपि एकनिष्ठस्य तदेकनिष्ठस्यैवासिध्यति। दक्षिणां ककुभं पश्यन्न कोनामोत्तरां दिशं प्राप्नोति॥ श्रीराम॥ ॥

नि॰प्र संकल्प्येति।।संकल्पार्थनत्परैरेवावगम्यते आप्यते।अग्रसंस्थितार्थः।अग्रेपुरोभागेषु संस्थितो प्यर्थः।अग्रस्थर्थपरैः पुरोव
५८ र्तिवस्तुतत्परैरेवावगम्यते।।अग्रेति।।योमूढः अग्रस्थेवस्तुनिबुद्धिसंस्थेबुद्धौस्थिते सतिसंकल्पसंकल्पितमर्थंप्राप्तुमिच्छ
ति।तदा अविवेकीएकविषत्वाभावादेकत्रतात्पर्याभावात्तनद्वयमग्रस्थंकल्पितंवोभयंनाश्रयेतत्।।यद्बुद्धिस्थंनतुप्रा

संकल्पार्थपरैरेवसंकल्पार्थोवगम्यते।।अग्रस्थार्थपरैरेवअग्रस्थोर्थोविगम्यते।।अग्रस्थेबुद्धिसंस्थेयस्संकल्पंप्राप्तुमिच्छति।।तदाप्सावेकनिष्ठत्वाभावात्तन्नाश्रयेद्द्वयं।।इह इहविद्याधरोहस्यामहंस्यामितिविवेदिकः
।।इत्येकज्ञानसाफलंदृष्टांतस्वार्थ्यसिद्धये।।तस्माद्धेकार्थनिष्ठत्वाद्भिक्षुजीविनउद्गतो।।प्राप्यउद्गात्म
नालब्धासंकल्पार्थस्समुत्पताः।।

प्तुमिच्छतिनतद्बुद्धिस्थमित्युभयोरप्यासिद्धिर्विनाशः।इहोतिस्यामहंइहदेशेकालेचविद्याधरस्यामितिवा।।अहमिहवै रा॰म॰
दिकस्यामितिवायदेकध्यानसाफल्यंएकवस्तुविषयस्यध्यानस्यफलंसंवक्षः।सएकार्थसिद्धयेदृष्टांतः।।तस्मादिति ४८
।।तस्मात्पूर्वोक्ताद्धेतोरेकार्थनिष्ठत्वात्संकल्पार्थैकनिष्ठत्वात्भिक्षुरूपेणजीवेनउद्गतांप्राप्यतेनउद्गात्मनासंक
ल्पार्थस्यपत्पताप्राप्ताः।।

48

भिक्षुति। तेभिक्षुसंकल्पसिद्धा जीवत्तुद्दरूपत्वात्। संकल्पानांमसत्यतांसाफल्यंप्राप्तास्ततःप्रत्येकंतज्जगत्पृथक्। विलक्षणांपश्यंति
स्वतंत्रत्वासत्यसंकल्पत्वाद्वेतिभावः। एवमिति॥ तेपूर्वोक्तभिक्षुसंकल्पकल्पिताजीवटब्राह्मणादयः॥ उद्दस्यमहिम्नास्वसंकल्पपुरीं
गताः

भिक्षुसंकल्पजीवास्तेप्रत्येकंतत्पृथक्जगत्॥ पश्यंतिरुद्ररूपत्वात्ताःसर्वेचसत्यतां॥ एवंतेभिक्षुसंकल्पाज्जीवटब्रा
ह्मणादयः। उद्दविज्ञानवशात्स्वसंकल्पपुरीर्गताः॥ ततोरुद्रेणसंगत्यविविशुस्तत्परंपदं॥ श्रीरामउवाच॥ एवंतेभिक्षु
संकल्पाज्जीवटब्राह्मणादयः॥ कथंसत्यत्वमायाताःसंकल्पार्थेकसत्यता॥ वसिष्ठउवाच॥ एकःसहस्रंभवतिय
थाचैषजनार्दनः॥ अंशावतारलीलाभिःक्षुद्रतेजागतीस्थितिं॥ एवंतेभिक्षुसंकल्पाज्जीवटब्राह्मणादयः॥ संभुद्धस
विद्दिकाशासत्याद्रवकिलस्थिताः॥८॥ ॥ इतिनिर्वाणप्रकरणेशतरुद्रोपाख्यानंनामचतुस्त्रिंशस्सर्गः॥ श्री॥

स्वसंकल्पकल्पितानि। स्थानानिगताःप्राप्ताः॥ इतिश्रीमत्स्थालसूरिसूनुनापदवाक्यप्रमाणपारावारदृश्वनीश्रीमुभञ्जदेवविदु
षाचार्येणविरचितेसंसारतरणिनाम्निवासिष्ठविवरणेनिर्वाणप्रकरणेशतरुद्रोपाख्यानंनामचतुस्त्रिंशः सर्गः॥ श्री॥

यो॰ क्षि सर्वमेषाजन्मपरंपरा स्वसंकल्परूपम्त्रीतिसिद्धेतिनिदर्शयितुंशतरुद्राख्यानमुक्तं॥इदानींमौषुप्तमौनसंपादकंवक्ष्यककटीप्रश्नसंघ
४८ दुर्घतयोवेतालप्रश्नसंघोनिरूप्यते।सुषुप्तेति।चित्तविलासिनोसंकल्पादिरूपंचित्तविलासंत्यक्त्वाकलनामलनिर्मुक्तःस्वासनारूपमल
रहितःसुषुप्तमौनवान्भवत्यमारालक्षणसुषुप्तमौनयुक्तोक्लाश्रवदृष्टवतत्परःअवलंबितब्रह्मभावस्तिष्ठावागिति॥वाग्मौनादीनां

49

वसिष्ठउवाच॥सुषुप्तमौनवान्भूत्वात्यक्त्वाचित्तविलासिनां॥कलनामलनिर्मुक्तःतिष्ठवत्ष्टवतत्परः॥ श्रीरामउवाच
द्विविधप्रोच्यतेराममुनिर्वरैरिह॥एकश्चाष्टतपस्वीस्याद्वाग्मौनमक्षमौनंचकाष्ठमौनंचवेद्म्यहं॥सुषुप्तमौनंमौ
नेशब्रह्मन्ब्रूहिकिमुच्यते॥ ॥श्रीवसिष्ठउवाच॥ ॥द्विविधप्रोच्यतेराममुनिर्मुनिवरैरिह॥एकश्चाष्टतपप
स्वीस्याजीवन्मुक्तोस्तथेतरः॥ ॥अभावितापांशुष्कायांक्रियायांबद्धनिश्चयः॥हठाज्जितेंद्रियग्रामोमुनिःस्यात्का
ष्ठतापसः॥

लक्षणंवक्ष्यते।मौनेवासुनीनांसमूहोमौनंनस्येशमुनिश्रेष्ठेत्यर्थः॥अभावितामिति॥अभावितायांब्रह्मभावनारहितायां
अतश्वशुष्कायांगीनीरसायांक्रियायांप्राणायामादिरूपायांबद्धनिश्चयःसन्हठयोगाज्जितेंद्रियग्रामोमुनिःकाष्ठतापसः राम
स्याद्॥ ४८

पर्येति॥ योमुनिः इदंजगत् यथाभूतंतथाबुद्ध्वाब्रह्मैवेदंसर्वमितिनिश्चित्यभावितात्माब्रह्मैवाहमितिनिश्चितात्मतत्त्वं
आत्मनिस्थितःस्वरूपमेवानुसंधानोव्यवहारमात्रेण लोकोपमोपिअन्तःस्वरूपसुखानुभवात्तृप्तास्तिष्ठति॥ससुनिर्जि
तस्मुक्तोमुनिःस्मृतः। उभयानुगतंसामान्यलक्षणमाह॥ एतयोरिति॥ शांतयोर्निर्विकारश्चित्तयोरेतयोः प्रकृतयोःमुनि
नाथयोःचित्तनिश्चयरूपात्मायोगेनतत्वज्ञानेनबाधश्चित्तस्यनिश्चयएकनिष्ठतातद्रूपश्चात्मास्वभावोयस्यतादृशोभावो

यथाभूतमिदंबुद्ध्वाभावितात्मात्मनिस्थितः। लोकोपमोऽपितृप्तोऽन्तर्यःसमुक्तोमुनिःस्मृतः॥ एतयोर्योभवेद्भावःशा
न्तयोर्मुनिनाथयोः। चित्तनिश्चयरूपात्मामौनशब्देनकथ्यते॥ वाङ्मौनंवचसांरोधोवलादिंद्रियनिग्रहः॥ अक्षमौ
नंपरित्यागचेष्टानांकाष्ठसंज्ञकं॥ प्रस्फुरच्चित्तकलनमेतन्मौनत्रयंस्थितः। एतेषांहिमौनानांविषयश्चकाष्ठताप
सः॥

भिप्रायोमौनशब्दैःनकथ्यतेसुषुप्तमौननिरूपणायप्रथममौनांतराणिलक्षयन्नाह॥ वागिति॥ वचसांनिरोधाज्जातंवा
ङ्मौनंवलात्हठयोगवशाच्चक्षुरादीन्द्रियनिग्रहोक्षमौनं॥ तद्वशादेवचेष्टानांशरीरतदवयवक्रियाणांपरित्यागःकाष्ठ
मौनंप्रस्फुरदिति॥ एतत्सर्वोक्तंमौनत्रयंप्रस्फुरच्चित्तकलनंविलसच्चित्तवासनंस्थितं॥ अतएतेषांहिमौनानांकाष्ठतापस
वविषयआश्रयोनजीवन्मुक्तइत्यर्थः॥ ॥

नि॰ ३६
५॰
50

अथचतुर्भिः श्लोकैः सुषुप्तमौनमाह॥ अविभागमिति॥ ध्यायतोऽध्यायतो वा अन्तर्मुखस्य बहिर्मुखस्य वा मुनेः अविभागं अविद्यमा
नजाग्रदादिविभागं अनायासं विद्यमानं ज्ञानकर्मेन्द्रियं निरोधक्लेशं अनाद्यं तं उपक्रमोपसंहाररहितं यदास्थितं ब्रह्मनिष्ठत्वं एत
त्सौषुप्तसुषुप्तिसंभवं मौनं उच्यते॥ महायोग एव सुषुप्तमौनमित्यर्थः॥ यदाह सर्वज्ञयोगी॥ प्रपंचस्य भानेऽप्यभाने समं यत्नवावि
द्ययाविद्यया लिंगतां गतदात्मस्वरूपं तदानंदसांद्रं परब्रह्मभावं महायोगमाहुरिति॥ यथा चशैवो शिवः स्वभाव एवैकः चिन्त्यते निर्द्व

अविभागमनाद्यासंपदनाद्यं ब्रह्मास्थितं॥ ध्यायतोऽध्यायतश्चैव सौषुप्तं मौनमुच्यते॥ यथाभूतमिदं सर्वं जगन्नाना
त्वविभ्रमं॥ यदास्थितमसंदेहं सुषुप्तं मौनमुच्यते॥ ॥

न्द्वाधिकः यथा सैव मनोवृत्तिर्महायोग इहोच्यत इति॥ यथेति॥ नानात्वविभ्रमं नानात्वेन परिभ्रान्तमिदं जगद्यथाभूतं येन प्र
कारेण निष्पन्नं तं प्रकारं सुषुप्तावब्रह्मरूपं स्तत्वा तदात्मकं निश्चित्य असंदेहं निर्विकल्पं यत् ब्रह्मभावेनास्थितं। तच्च सौषुप्तं मौन
मेव॥ क्वचित्तु सुषुप्तं मौनसंगतमिति पाठः॥ तत्र मौनसंगतं मौनसंस्थानं मौनस्य प्रकारमित्यर्थः॥ ॥ ॥ एम

५॰

अनेकेति। इदं जगत् अनेकसंविद्रूपात्मा अनेकसंविद्रूपा आत्मानः स्वभावा यस्य तादृशमाततं व्याप्तं शिवं ब्रह्मैवेति यदनं
तनिरवधिकमर्मास्थितं ब्रह्मनिष्ठा तत्सौषुप्तं मौनमुच्यते। आकाशमिति। इदं जगत् आकाशं चिदाकाशविवर्तित्वात्। आका
शं नैव च मूर्तिमत्त्वात्॥ तथा अस्ति च अधिष्ठानसत्तायाः सद्रूपेणा भातितः। नास्ति च कल्पितत्वात्। इति जगतो ब्रह्मव्यतिरेकेणाना

अनेकसंविद्रूपात्मशिवमेवेदमाततं इत्यास्थितमनंतं यत्सौषुप्तं मौनमुच्यते आकाशं नैव चाकाशं सर्वमस्ति न॥
नास्ति व इति स्थितं समं शांतं यत्तन्मौनं सुषुप्तवत् सुषुप्तमौनं योगीशैर्द्विविधैः प्राप्यते खलु॥ सांख्ययोगिन एके
सुरे परे योगयोगिनः॥ सम्यग्ज्ञानावबोधेन सिद्ध एकसमाधिना॥ सांख्ययेवाववुद्धाये तेसांख्या योगिनः स्मृता॥

स्तित्वं निश्चित्य सममेकाकारं शांतं निर्विकारं चयस्थितं॥ यानिष्ठा तत्सुषुप्तवन्मौनं सुषुप्ततुल्यं मौनमित्यर्थः। सुषुप्तेति॥
सांख्ययोगिनो योगयोगिनश्च वक्ष्यंते। सम्यगिति॥ सम्यग्ज्ञानावबोधेन तत्त्वज्ञानोदयेन सिद्धोय एकसमाधिः एकस्मिन्नद्वि
तीये ब्रह्मणि चित्तविश्रांतिरूप उपलक्षिता ये योगिनः ते सांख्यये वसम्यग्ज्ञाने नैवाववुद्धा इति कृत्वा सांख्ययोगिनः स्मृताः॥

नि·प्र·द्द प्राणादीनि॥ येतुयुक्त्याअष्टांगयोगेनप्राणादीनामनिलानांसंशांतौसत्यांअनामयमनाद्यनंतंचपदमागतास्तेयोगयोगि
५१ नःस्मृताः उपादेयमिति॥ शांतमकृत्रिमंपदमेवसर्वेषांयोगिनामुपादेयं॥ अतोहेतोःसांख्यैर्योगिभिर्यत्स्थानंप्राप्यतेयो
५1 गैरपितत्परंस्थानंप्राप्यते॥ किंतत्पदमित्यत्राह॥ यत्रेति॥ यत्रयस्मिन्पदेवासनावागुरोक्रांत्वावासनैववागुरावंधकत्वात्॥

घ्राणाद्यनिलसंशांतौयुक्त्यायेपदमागताः॥ अनामयमनाद्यनंतंतस्मृतायोगयोगिनः उपादेयंतुसर्वेषांशा
तंपदमकृत्रिमं॥ यत्सांख्यैःप्राप्यतेस्थानंपरंयोगैस्तदेवहि॥ यत्रप्राणमनोवृत्तिरत्यंतंनोपलभ्यते॥ वासना
वागुराक्रांतातद्विद्धिपरमंपदं॥ मनोसुधैवाभ्युदितमसदेवानवेक्षणात्॥ स्वप्नेस्वमरणाकारंप्रेक्ष्यमाणंनविद्यते

तयाआक्रांतायायाप्राणमनमोर्वृत्तिर्व्यापारः॥ अत्यंतंसम्यगुपलभ्यतेनतदेवात्मस्वरूपंपरमंपदंविद्धि॥ परब्रह्मस्व एम ५१
रूपंविद्धि॥ मनइति॥ मनस्तावद्वस्तुतोऽसदेवअनवेक्षणादविचारात्सुधैवस्वप्नेस्वमरणप्रत्ययवदुत्थितं॥ अतःप्रे
क्ष्यमाणंविचार्यमाणमपिसंनविद्यते॥ अविचारसिद्धस्यविचारेणनिवृत्तिर्युक्तैवेतिभावः॥ ॥ ॥

ऌकेतिएकतत्वघनाभ्यासः ४। एकस्यैवत्वाभिमतस्यतत्वस्यनिरंतरमनुसंधानं तथाप्राणानांविलयः ४ मनोनिग्रहश्चे
तित्रिमयमेवमोक्षशब्दस्यसंग्रहः ४ अतएवमोक्षसाधनमित्यर्थः ४॥ एकेति॥ एकतत्वाभ्यासादीनांत्रयाणांमध्येए
कस्मिन्नपिसिद्धेइतरेअपिसिध्यतइत्यर्थः ४ अविनाभाविनी इति श्लोकद्वयंवाक्यंजीर्णांप्राणाचेतसीकद्वर्शी

एकतत्वघनाभ्यासः ४ प्राणानांविनांविलयस्तथा॥ मनोविनिग्रहश्चेतिमोक्षशब्दार्थसंग्रहः ४॥ एकार्थेभ्य
र्थोभ्यसनप्राणरोधविलयरिक्षुपा ४॥ एकस्मिन्नेवसंसिद्धेसर्थ्यंतिपरस्परं स्पर्श॥ अविनाभाविनीनित्यंज
न्तूनांप्राणचेतसी॥ कुसुमामोदवत्मिश्रेवतिलइवस्थ्यते॥ आधाराधेयवद्धेवएकाभावेविनश्यतः ४ कुसु
त ध्यानानाशेनकार्यंमोक्षाख्यमुत्तमं॥ एकस्मिन्सुदृढेतस्मिन्नावंविभावयेत॥ भावोभावत्वमापन्नेतिस्वभ्यासापावदाततां।

॥राम॥ ॥श्रीकृष्ण॥

अविनाभावित्वाभिलातितिलवत्कुसुमामोदवदाधाराधेयवच्चमिश्रेपरस्परसंगतेएवास्थितेहेतेरेकस्याभावेद्व
अपिविनश्यतः ४॥ स्वनाशेनकारणेनमोक्षाख्यमुत्तमंकार्यंकुरुतश्चा एकस्मिन्निति॥ सुदृढेअभ्यासेनएक
स्मिंस्तत्वेनाकडार्वविततहतिंकिंभावयेत्यात्रवर्तमानेध्यानावतस्वभ्यासाद्वोरातत्वंसततभावत्वेभावयामान

पदिति॥ वेतः चित्तं यदेकचातं यस्मिन्वस्तुनि एकाग्रं भवति॥ चिराभ्यासवशाभावः॥ चिरकालानुसंधानवशात् तात्प्रांतता-
साषु विशेषौ येनि वृत्तनिरिचिल भेदः सतः हृ ॥ तात्नं देववत्खु भवति। अस्तीति मंडुलदेशं जिघांसयां भयाभङ्गरोष्छया
॥ समस्तविज्ञव त्सूपहरि रामो सादिकल्पितवदु चिलिसमर्पतोन। निर्निमित्तमिति। सवेता ॥ क्रुधितोपि निरागस्कं निरा

यदेकतानं भवति वेतस्तद्भवति ज्ञारा ॥ त॥ शान्तशेषौघ चिराभ्यासस्वाभावतः॥ ॥ वसिष्ठ उवाच॥
संसृति ॥ स्वप्नविभ्रान्तौ वितालो दृक्तानि मा-श्राप्र प्तानाकार्ता पसुभाक्त्र संगात्स्मृति मागतात॥ अस्ति
विंध्य महाटव्यां वेतालो विपुलो कृति ॥ सर्कविन्संडुलं गवादाजा मामजिघांसया॥ सवेतालो वं संस्तृर्वेकस्मिं
श्चित्सज्जाना व्यादे॥ वडुवत्तुपहारेणानित्यतृप्तः तपासुखी। निर्निमित्तं निरागस्कं पुरोऽप्यभ्यागतं न सः॥
क्रुधितोपि नरं हंति सन्नोदिन्यायदर्शकः॥ सकाले नाथ्वीगो होजगामनगरान्तरं॥ न्यायशुल्कयान रंभोक्तुं कुधांस

पराक्षं नरं पुरोभ्यागतमपि निर्निमित्तं न हंति॥ हियस्मात्कारणात्संतो विद्वांसः न्याय दर्शकाः न्यायस्य प्रवर्त्तकाः वेतालो   मप्तिनोदितः॥ ॥
ब्रह्मवित्तया अन्यायेन नहंवीत्यर्थः॥ ॥

तत्रेति॥ रात्रिचर्याविनिर्गतं राजानो हि राज्यस्थितिविचारयीनुमेकाकिन४प्रत्यन्नमेवेषणात्रवटंति॥ तयरात्रि

तत्रप्रापासमूपालंरात्रिचर्याविनिर्गतं॥ तमाह घोरेण राद्रेनोप्र निशाचरः॥ राजन लब्धोसि भीमेन वेनले न मयाधुना॥ क्व गच्छसि विमूढोसि वव्मो ज्ञममधमे॥ राजोवचा॥ ततो रात्रिवरनिन्यीयंमवेदत्सिवल्लादिहा॥ तल्ले सहस्रधा मूर्ध्नी स्फरिष्यति नसशय४॥ ॥वेतालउवाच॥ ॥नत्वमन्य हमन्यायन्या योयंहीमयोच्यते॥ राजासि सकलाशाश्चपूरणीया४ त्वयार्थिना॥ ममैतामर्थितां राजन् संतवार्थीप्रपूरय॥ प्रश्नानिमान्मयोक्तास्त्वसम्यग्गा ख्यातुमर्हसि॥ कस्यासूर्यस्य रश्मीनां ब्रह्माण्डं निरुशारावा४॥ कस्मिन्स्फुरतिपवनेमहागगनेरावा४॥ स्वप्नात्स्वप्ना तरं गच्छन् शतशोथसहस्रश४॥ त्यजन्नत्यजति स्वच्छकस्यत्न पप्रसास्वरं॥ रंभास्तंभोयथापत्रमात्रमेवपुन४पु न४॥ अन्तरं तम्वथा तस्वतथाको गुण४ स एवहि॥ ब्रह्माण्डाकाशात् तोधस्य यमंरत्न मेस्व४॥ अपरित्यजतो नुत्व कस्याराघर मारावा४॥ कस्याराव याव घोवपरमाणुमहागिरेः॥ शिलाता मिव दे४ कान्तर्निनूपामत्ताजगत्त्र यी॥ वसिष्ठ उवाच॥ इत्युक्तवति वेताले वक्तुप्रश्नान्हि हयस४॥ नवाचवनन राजा दंताशु द्यवत्लावर॥ ४॥ श्रीराम॥ क्रुल

यावितिर्गतममेति॥ सत्तवार्थी सतवदर्थोऽस्य यश्लोकपचके तवेतालप्राश्ना४ कस्योति॥ तेवषडपुन्त एवसरस्यष्टा

यो॰ वा॰ ३०

निः श्रुः ६

53

तत्रत्रसांडानि कस्य स्वरूपस्य रश्मीनां रूपाणि ४ स्फुलिंगा ४ इति प्रश्नस्योत्तरं श्लोकद्वयेनाह ॥ एष इति । कस्य स्वरूपस्ये
ति ४ एषा एकस्वरूपं ४ चित्स्वरूपं एवेति । भाग्तरेणाप्युक्तं ४ यतो सौ चित्स्वरूप एवैतत्तु सर्वं जगन्नयं ति प्रकाशयति । तस्य
भासा सर्वमिदं विभातीति श्रुतेः । एष चित्स्वरूप उदित इति श्लोकविग्रहः ४ । तत्र उदितत्वे मोक्षस्य प्रमेवार्थः ४ ॥ तस्य प्रसिद्ध
स्वरूपं केवलं स्वयमाह । एष विद्या नाम्ना भाविता नाम ४ जीवरूपेण सर्वान् ४ करणान् प्रवर्तक ४ परमेश्वर ४ भास्करादीनां

राज्ञो काय ॥ एष चित्सूर्य उदिताः ४ सर्वमेतत्प्रकाशयन् सौ ॥ विज्ञानात्मा परमो भाविताख्य पक्षा इमे ये भुवनभोगास्ते
सैव त्र मरेस्सव ४ ॥ विज्ञानपरमार्कस्य भासा भान्ति भवंतिव ॥ ॥ श्रीराम ॥ कृष्ण ॥ ॥ कृष्ण ॥ ॥

मपि तत्तेजो लेशत्वात् । पद्मं गीतासु ॥ यदादित्यगतं तेजो जगद्भासयतेऽखिलं ॥ यच्चन्द्रमसि यच्चाग्नौ तत्तेजो विद्धि मामकमिति
॥ इमे भुवनाभोगास्तस्यैव विज्ञानपरमार्कस्य त्रसरेणुतुल्या अंशाः ४ तस्यैव भासा भावंति ध्रुवं तस्य येते प्रतीचा ॥ ॥ श्रीराम ॥

राम

५३

कस्मिन्पवने महागगणादयो रेणवः स्फुरंतीति द्वितीयप्रश्नं श्लोकद्वयेन विवृणोति ॥ कालेति कालसत्ता कालरूपा याः शक्तेः स्फूर्तिः इत्यर्थं नभः स्फूर्तिः न
भः सगत्ता स्पंदसत्ता स्पंदस्वभावस्य वायोः सत्ता अथ चिन्मयी शुद्धचेतनसत्ता च केवलचेतनस्य दृष्टिश्च इत्यादि चेतना चेतनात्मकं पावनं । विद्धिव
तं रूपं चंचलरजः कुसुमांगे कुसुमावयवे ह्यामोद इव परमात्ममयैवायौ तदतद्रूपकं तद्रूपमतद्रूपं च यतः स्फुरति । तत्र तद्रूपत्वं सद्रूपत्वात्तथा
समानमलाक्षेन विदाकारेण प्रतीतिहेतुत्वाच्च अतद्रूपत्वं विकारित्वजडत्वदुःखमयत्वादिभिरिति द्रष्टव्यं स्वप्नात्स्वप्नान्तरं शतसहस्रो

कालसत्ता नभःसत्ता स्पंदसत्ता च चिन्मयी ॥ शुद्धचेतनसत्ता च सर्वमित्यादि पावनं ॥ परमात्ममयैवायौ रजः स्फुरति चंचलं ॥ कुसुमो
ग इवामोदस्तद्रूपकं यतः ॥ जगदाख्यमहास्वप्ने स्वप्नात्स्वप्नान्तरं व्रजन् । रूपं त्यजति नो शांतं ब्रह्म शांतं त्वदृढं हितं ॥ रंभास्तंभो
यथा पत्रमात्रमेवोत्तरोत्तरं ॥ अंतरं तस्य थैवेदं विश्वं ब्रह्म विवर्त्यपि ॥ ॥

गच्छत । स्वर्ग स्वप्नात्त्यजन्नपि स्वच्छं स्वभावं स्वरूपं न त्यजतीति तृतीयप्रश्नं श्लोकेन विवृणोति । जगदिति । जगदेव महास्वप्नः मायामयत्वा
त् । तत्र जन्मानि कृष्टस्वप्नाः तादृशात्स्वप्नाननुभवन्नप्यात्मा शांतत्वदृढहितं ब्रह्मणो निर्विकारस्वरूपे कल्पिते शांते रूपं न त्यजति । संसर
न्नपि जीवो ब्रह्मभावं न त्यजति । संसारस्य कल्पितत्वादिति भावः । रंभास्तंभः कदलीस्तंभः स यथा अंतरं तर्वि विविच्य दृश्यमानः पुनः पु
नः पत्रमात्रमेव त्वंमात्रमेव न तथा विचार्य पि वि विचित्रतया वर्तमानमपि विश्वमिदमंतर्विचार्यमाणं ब्रह्मैव ॥ ॥

नि॰प्र॰ ब्रह्मांडादयोमहांतोपिभावाअणुत्वमपरित्यज्यांतएकस्याणोःपरमाणोरितिपंचमंप्रश्नंसार्धेनश्लोकेनविवृणोति।सूक्ष्मत्वादिति।परमा
५४ त्मासूक्ष्मत्वादिंद्रियाग्रहीतुमशक्यत्वादलभ्यत्वात्प्राप्तुमशक्यत्वाच्चपरोणुकःपरमाणुतुल्यःअसावेवपरमात्माअनंतत्वाद्देशका
54 लादिभिरपरिछिन्नत्वात।मेर्वादिमूलतांपरिछिन्नस्यमेर्वादेर्मूलतामुपादानत्वंप्राप्तःतच्चमेर्वादिवस्तुतस्यपरमात्मनःपुरतःप

सूक्ष्मत्वादप्यलभ्यत्वातपरमात्मापरोणुकः॥अनंतत्वादसावेवप्राप्तोमेर्वादिमूलतां॥परमाणुवदाभातिमेर्वादिपुरतो
स्यतु॥परोऽणुरेषालभ्यत्वात्स्थूरकत्वान्महागिरिः॥सर्वावयवरूपोपिनिरस्तावयवःपुमान्॥ ॥

रमाणुवदाभाति।परमात्ममहत्त्वापेक्षयामेर्वादीनामतिसूक्ष्मत्वात॥अनवयस्यैवैकस्यपरमाणुरूपस्यमहागिरेरीयंजगत्त्रयीशिलां
नर्गतातिनिबिडैकांतरूपाकठिनैकस्वभावामज्जासारभूता॥२॥इतिषष्ठंप्रश्नंसार्धेनश्लोकद्वयेनविवृणोति।परइति॥एषपुमानल राम
भ्यत्वादप्राप्यत्वात्परमाणुशब्दवाच्योपिशब्दस्थूरकत्वात।व्यापकत्वान्महागिरिरपिसर्वावयवरूपोपिस्थूलप्रपंचाकारतयादृश्य ५४
मानोपिवस्तुतोनिरस्तावयवःसर्वप्रपंचाधिष्ठानरूपिणोऽस्य॥ ॥

सर्वप्रपंचाधिष्ठानरूपिणोस्य विज्ञप्तिमात्रसारत्वात् विज्ञानमात्रमेव सारोंशः इति कृत्वा विज्ञप्तिमात्रस्यास्य एषो जगत्त्रयमज्जा। मात्रं घनी
भूतःसारोंश एव हि यस्मात्कारणाज्जगत्त्रयं विज्ञानमात्रस्य मध्यं मध्ये वर्तते अतो मध्यवर्तित्वान्मज्जारूपत्वं युज्यत इति भावः॥ ॥इति
वासिष्ठविवरणे निर्वाणप्रकरणे वेतालोपाख्यानं नाम पंचत्रिंशः सर्गः॥ ॥पूर्वं सौषुप्तमौनसंपादकविवेकप्रदर्शनाय वेता

विज्ञप्तिमात्रसारत्वात्सर्वाधिष्ठानरूपिणः॥ अस्य विज्ञप्तिमात्रस्य मज्जामात्रं जगत्त्रयं। विज्ञानमात्रमध्यं हि विद्धि साध्यो
जगत्त्रयं॥ इति राजमुखाच्छ्रुत्वा वेतालः शांतिमाययौ। भावितात्मतया तत्र विचारोत्थितया धिया॥ उपशांतवपुर्भूत्वा
गत्वैकांतमनिंदितं॥ बभूवाविरलध्यानी विस्मृत्य विपुलां क्षुधां॥ इति निर्वाणप्रकरणे वेतालोपाख्यानं नाम पंचत्रिं
शः सर्गः॥ संहृत्य सर्वतश्चित्तं स्तिमितेनांतरात्मना॥ प्रवाहपतितं कुर्वन्निरिच्छस्तिष्ठ शांतधीः॥ ॥

लप्रश्नो निरूपितं। इदानीं तु दुर्लभापि विश्रांतिः स्वप्रयत्नेनैव लभ्यत इति दर्शयितुं भगीरथकथा कथ्यते॥ संहृत्येति। सर्वतो
बाह्यविषयाच्चित्तं संहृत्य प्रत्याहृत्य स्तिमितेन स्वरूपनिष्ठेन अंतरात्मना अंतःकरणेनोपलक्षितः॥ प्रवाहपतितमाचारक्रमप्रा
प्तं कर्म कुर्वन्निरिच्छः शांतधीस्तिष्ठ॥ ॥

आकाशेति। मनसैव विचारतत्परेणाश्चित्तेनैव यथेति। चित्रचमत्कृत्या आश्चर्यकारिणी चित्रहृत्तिः चित्रचमत्कृतिस्तया। यौवन इति। श्लोकद्वयं वाक्यं॥
सुविरागचमत्कारा शोभनो विरागचमत्कारो वैराग्यनिश्चयो यस्यां सा विचारकारिणी कासूक्ष्मो विचारः। एकांत इति। असमंजससंकुलां असमंजसम

आकाशविशदं कृत्वा मनसैव मनो मुनिः। तिष्ठेः कुशम शान्तात्मा सर्वत्र समदर्शनः॥ स्थिरबुद्धिरमूढस्य यथाप्राप्तानुवर्तिनः॥ राज्ञो भगी
रथस्येव दुःसाध्यमपि सिध्यति॥ ॥राम उवाच॥ ॥यथा चित्रचमत्कृत्या राज्ञो गंगावतारणं॥ भगीरथस्य संपन्नं तन्मे कथय मे प्रभो॥ ॥
वसिष्ठ उवाच॥ ॥आसीद्भगीरथो नाम राजा परमधार्मिकः॥ सुवस्स समुद्रयुक्ताया मंडली तिलकोपमः॥ संकल्पानन्तरं प्राप्तय
थाभिमतमर्थिनः॥ चंद्रप्रसन्नवदना यस्मादर्थिता मतो रिव॥ गंगा सा पानपुद्धृत्य येन पातालवासिनः॥ यो जिता ब्रह्मणो लोके बांध
वा लोकबंधुना॥ यो वने वर्तमानस्य तस्य भस्मपितेरपि॥ स विचारयतो लोकयात्रां पर्याकुलामिमां॥ सुविरागचमत्कारविचार
कारिणी कोदभूत्॥ वयस्यपि वतारुण्ये दैवाद्वल्लीमराविव॥ एकांते चिंतयामास महीपतिरसावथ॥ जगधात्रामिमां कृत्यमसमं
जससंकुलां॥ पुनर्दिनं पुनः श्यामा दानादानशतं पुनः॥ तदेव सुखं विरसं लभ्यते कर्म कुर्वता॥ ॥
न्याप्यं तेन संकुलं व्याकुलां पुनरिति। श्यामा रात्रिः कर्म सांसारिकं व्यापारं सुखं विरसं नीरसं विपरीतरसं वा दानादानशतं लभ्यते। त्यागभोग
शतं प्राप्यते॥ ॥

येनेति।येनवस्तुनाप्राप्तेनसताअप्राप्तंवांछितं।किंचिदपिनावशिष्यते॥तदेवकृतंसुकृतंमन्येशेषमन्यत्कर्मविडंबिकैवपुनःपुनःप्रवृत्तिहेतुत्वात्॥बंधनिवृत्ति
हेतुरेवसत्कर्मेत्यर्थः।यदाहप्रह्लादः।तत्कर्मयन्नबंधायसाविद्यायाविमुक्तये॥आयासायापरंकर्मविद्यान्याशिल्पनैपुणमिति।विरतीति।श्लोकद्वयंवाक्यं।
विरसाम्यात्मना।विरसाम्यरूपेणसर्वानुगताकारेणयदुत्थितःयदुदितःतेननिर्विभागविलासिनानिर्विशेषंस्फुरतापूर्णेनअखंडेनभरितात्मनाव्याप्तेनज्ञेय।

येनप्राप्तेनलोकेस्मिन्नाप्राप्तमवशिष्यते॥तत्कृतंसुकृतंमन्येशेषंकर्मविडंबिका॥पुनःपुनःपर्युषितंकर्मकुर्वन्नलज्जते॥मूढवद्धिरमूढस्तुकिं
कुर्यात्किलबालवत्॥अथैकदाहिद्विग्नमनाःकदाचित्त्रितुलंगुरुं॥एकांतेसंस्थितंभीतःसमपृच्छद्भगीरथः॥जरामरणमोहादिरूपाणांभयका
रिणां॥भगवन्सर्वदुःखानांकथमन्तःप्रजायते॥ ॥त्रितुलउवाच॥ ॥विरसाम्यात्मनोत्थेननिर्विभागविलासिना॥राजन्ज्ञेयाववोधेनपू
र्णेनभरितात्मना॥१॥क्षीयंतेसर्वदुःखानिच्छिद्यंतेग्रंथयोभितः॥संशमंविलयंयांतिसर्वकर्माणिचानघ॥ ॥

ज्ञेयस्यपरतत्वस्यसाक्षात्कारेणसर्वदुःखानिक्षीयंते॥ग्रंथयोबंधहेतवःअहंकारादयश्छिद्यंतेछिद्यंतेसंशयाःकैवल्यमस्तिनवाआत्मापरमानं
दरूपोभवतिनवेत्येवमादयःसममायांतिसर्वकर्माणिपुण्यपापरूपाणिसर्वाण्यपिकर्माणिसममायांति।भिद्यतेहृदयग्रंथिरित्यादिश्रु
तेः॥ ॥

नि॰प्र॰ किंतत्ज्ञेयमित्यत्राह ज्ञेयमिति ज्ञानस्वरूपोनित्यःसर्वगतःसुविशुद्धआत्मैवज्ञेयइत्यर्थः। चिन्मात्रमिति। श्लोकद्वयंवाक्यं॥ शांतत्वादिलक्षणंचिन्मात्रस्वरूपंनि
५६ र्गुणंब्रह्मैवास्मिइतरदात्मव्यतिरिक्तंदेहादिरूपंवस्तुकिंचिदपिवस्तुतोनास्तीतिवेद्मि। किंतुअत्रास्मिन्नर्थेप्रतिपत्तिः ज्ञानंस्थिरप्रतिष्ठंनेति॥ अ

56

ज्ञेयंतुविद्धिआत्मानंसंशुद्धंज्ञप्तिरूपिणं॥ सचसर्वगतोनित्यंनास्तमेतिनचोदयं॥ ॥भगीरथउवाच॥ ॥चिन्मात्रंसर्वगंशांतमस्मिनि
र्मलमच्युतं॥ देहादिनेतरत्किंचिदितिवेद्मिमुनीश्वर॥ किंत्वत्रप्रतिपत्तिर्मेस्फुरतामेतिनप्रभो। एतावन्मात्रसंवित्तिःस्यामहंसर्वदा
कथं॥ ॥त्रितउवाच॥ ॥ज्ञानेनज्ञेयनिष्ठत्वमेतिचेतोहृदंबरे॥ ततःसर्ववपुर्भूत्वाभूयोजीवोनजायते॥ ॥

तःएतावन्मात्रसंवित्तिःचिन्मात्रानुसंधानमयीकथंकेनप्रकारेणस्यात्प्रकारंनिरूपयेत्यर्थः॥ ज्ञानेनेति॥ ज्ञानेनस्वरूपप्रमाणलक्षणेन
ज्ञानसाधनेनचेतोयदाहृदंबरेहृदयाकाशेज्ञेयनिष्ठत्वंस्वस्वरूपनिष्ठत्वमेति॥ ततस्तदाजीवःसर्ववपुर्भूत्वासर्वात्मकोभूत्वाभूयोनजा राम
यतेअंतर्मुखतयास्वस्वरूपनिष्ठत्वेस्वयमेवसर्वात्मकंब्रह्मभूत्वापुनर्जीवभावंनेतीत्यर्थः॥ ॥ ५६

किंतज्ज्ञानमित्यत्राह अमक्तिरिति। श्लोकत्रयं वाक्यं॥ असक्तिर्विषयेषु अनामक्तिः पुत्रदारगृहादिषु। अनभिष्वंगः ममताराहित्यं इष्टानिष्टोपपत्तिषु प्रि
याप्रियेषु नित्यं समचित्तत्वं हर्षविषादराहित्यं अनन्ययोगेन अभेदभावनया आत्मनः स्वस्वरूपस्य अनारतम विछिन्नं तद्भावनं ब्रह्मभावनं।
ब्रह्मैवाहमित्यनुसंधानं विविक्तदेशसेवित्वं विविक्तः पूतो निर्जनश्चयो देशः तत्सेवनशीलत्वं जनसंसदि पामरजनसभायां अरतिरन

असक्तिरनभिष्वंगः पुत्रदारगृहादिषु। नित्यं च समचित्तत्वमिष्टानिष्टोपपत्तिषु॥ आत्मनोनन्ययोगेन तद्भावनमनारतं॥ विविक्तदेश
सेवित्वमरतिर्जनसंसदि॥ अध्यात्मज्ञाननिष्ठत्वं तत्वज्ञानार्थदर्शनं॥ एतत्ज्ञानमितिप्रोक्तमज्ञानं यदतोन्यथा॥ रागद्वेषरू
यकरं संसारव्याधिभेषजं॥ अहंकारोपशांतौ तु राजन् ज्ञानमवाप्यते॥ ॥भगीरथ उवाच॥ ॥शरीरेस्मिन्स्थिरारूढो गिरौत
रुरिवस्थके॥ अहंभावो महाभाग वदमेत्यज्यते कथं॥ ॥

तत्परत्वं तन्‍ वस्थानं अध्यात्मज्ञाननिष्ठत्वं आत्मविषयज्ञानं तत्वज्ञानार्थदर्शनं तत्वज्ञानप्रयोजनस्यात्यंतिकदुःखोपरमस्यानुसंधानं एतत्पूर्वोक्तं ज्ञा
नसाधनत्वात्॥ ज्ञानमितिप्रोक्तं। इत्येतोन्यथा उक्तसाधनविपरीतं विषयाशक्त्यादिकमज्ञानं संसारहेतुस्यादित्यर्थः॥ रागेति॥ देहादावहंभा
वत्तस्यात्मज्ञानप्रतिबंधकत्वात्। तदुपशांतावेवात्मनः स्वरूपमवगम्येत इत्यर्थः। शरीरइति। संसारस्यानादित्वात्तन्मूलभूतस्या
हंकारस्यदृढमूलतयात्यागोदुःकरइतिभावः॥ ॥

नि·प्र· पौरुषेणेति॥ पौरुषेण प्रयत्नेन वासनाक्षयहेतुः सम्यग्ज्ञानसमाध्यभ्यासादिरूपः पौरुषः प्रयत्नः तेन भोगौघभवनां विषयवासनां विष
यवासनां त्यक्त्वा विकसितां परिपूर्णां सत्तां गत्वा आश्रित्य अहंकारलयं व्रजेत् साधयेदित्यर्थः॥ यत्रणेति॥ लज्जादिरत्र वित्तेक
५७ र्मीति वेतमः सर्को वा लज्जा आदिशाज्ञाति कुलाभिमानादिग्रहणं॥ तदुक्तं॥ घृणा शंका स्पृहा लज्जा जुगुप्सा चेति पंचमी। कु

57

॥ ॥त्रितुलख्याव॥ ॥पौरुषेण प्रयत्नेन त्यक्त्वा भोगौघभावनं॥ गत्वा विकसितां सत्तामहंकारलयं व्रजेत्॥ यंत्रणापं
जरं यावद्भग्नं लज्जादिनाखिलं॥ अकिंचनत्वशेषेण स्फुटा तावदहंकृतिः॥ सर्वमेतद्धियात्यक्त्वा यदितिष्ठसि निश्चलः॥
तदहंकारनिलये त्वमेव परमं पदं॥ ॥

लंशीलं तथा जातिरष्टौ पाशाः प्रकीर्तिता इति। तादृशं लज्जादिरूपं यंत्रणापंजरं अकिंचनत्वशेषेण चत्रूपातिरिक्तं किंचिदपि वयस्य नास्ति सो किं राम
चनः॥ तद्भावमात्रशेषेण यावदखिलं न भग्नं न त्यक्तं तावदहंकृतिः स्फुटा न निवर्तत इत्यर्थः॥ सर्वमिति॥ एतत्सर्वं लज्जाभिमानादिकं सर्वमित्य ५७
र्थः॥ ॥

शांतेति। शांतान्यशेषविशेषणानि ब्राह्मणोहं गृहस्थोहमित्यादीनि यस्य विगता भीर्भयहेतुः यस्मात्॥ संत्यक्ताः सर्वा एषणाः पुत्रकलत्रा
दिवांछा येनासौ तादृशः॥ सत्त्व अरिषु साम्याप्तिर्यं त्यक्त्वा अकिंचनत्वमेव गवा आप्तिर्यथा तोहं कृतिरस्तदेहकलनस्तेष्वेव वारिषुभि
क्षामटन्मामपरित्याज्यं गुरुमपि अलं सम्यग्झितवान्यादि भवासितत्वादिः। वीरपक्षे वैरसि। अनातादपुनतोसि। सर्वोत्कृष्टं ब्रह्मैवा

शांताशेषविशेषो विगतभीः संत्यक्तसर्वैषणो योगवान्नूनमकिंचनत्वमरिषु त्यक्त्वा समप्राप्तिपः। शांताहंकृतिरस्तदेहक
लनस्तेष्वेव भिक्षामठन्नामप्रक्षितवानलं यदि भवस्फवैस्तद्वैरसि॥ ॥ वसिष्ठ उवाच॥ ॥ अथ तस्य गुरोर्धर्क्रा दित्याकार्य
भगीरथः॥ मनस्याहितकर्त्तव्यः स्वापारपरो भवत्॥ २०॥ ततः कृतिपयेष्वेव वासरेषु गतेषु सः॥ अग्निष्टोममखं चक्रे स
र्वत्यागैकसिद्धये॥ २१॥ गोभूम्यश्वाहिरण्यादि दद्दौ धानमशेषतः॥ द्विजादेवार्त्तबंधुभ्यो गुणापात्रविचारपरः॥ २२॥
दिवसत्रयमात्रेण सर्वमेव परित्यजन्॥ अस्वास्थ्यमात्राशेषोसावासौ सीद्धा ना भगीरथः॥ २३॥ ॥ श्रीराम॥ ॥ कृष्ण॥ ॥

सीत्यर्थः॥ अथेति। मनस्याहितकर्त्तव्यः गुरूपदिष्टं कर्त्तव्यं चित्ते निधायेत्यर्थः। स्वव्यापारपरः राज्यचिंता स्वव्यापारः तत्र तत्परो वा
निवाभूदिति। तत इति। सर्वत्यागैकसिद्धये सर्वधनत्यागावसरसंपादनायेत्यर्थः॥

वा॰ प्र॰ ६

५८

58

अर्थ इति॥ अथ भगीरथ॥ सर्वार्थरिक्त॥ सर्वार्थरिक्तं सर्वधनरहितं खिन्नप्रकृतिपौरकं खिन्नाः दीनाः प्रकृतयो मात्यादयः पौराश्च प्रजा

नाभ्युदयस्मिन्नतं स्वीयराज्यं तृणमिव सोमांति नेखारा ज्यासीमं तेवत्तमानाय अरपदंदौ॥ सामंतिन इति पाठे समेनाः समंततः संभवादेशाः तद्देते सा

मीपदेशाधिपतयः इत्यर्थः॥ आक्रांत इति॥ द्विषता राज्यो राजा भवेवसघनिस्य गृहे मंडले ख्यारा स्वत्र अक्रांते सतीति अ सो भगीरथ॥ अ

अथ सर्वार्थरिक्तं तत् खिन्नप्रकृतिपौरकं॥ सोमांतिनेत्तृणमिव राज्यं स्वमदद्दौ॥ आक्रांते द्विषता राज्ये मुनिः सघनिमंडलो

॥ आधोवासो वशेषो ऽसौ निर्जगाम स्वामंडलात्॥ यत्र न ज्ञायते नाम्ना यत्र न ज्ञायते मुखात्॥ तत्र ग्रामे स्वार रोष्ठ दूरेषु वासा

धै ष्विबाश॥ ३६॥ इत्यल्पेनैव कालेन प्रख्यातसकलैषणः॥ परमेण ग्रामेनासौ प्रापविष्णांतिमात्मनि॥ अथ स वेदीयानि

रूपीठ कदाचित्कालयोगतः॥ अवज्ञः॥ सं त्रु णा क्रांतं स्वमेव प्राप तत्पुरं॥ नानागारांश्च तत्रासौ प्रवाह पतितांश्च

तान् ग्रामपौरान् मंत्रिणां चैव शनैर्भिक्षामयाचत॥ ॥ राम ५८

धौवासा वशेषः परिधानमात्रशेषो मुनिः सत्यमंडलान्निर्जगाम अर्मान्निति॥ अवज्ञः स्वस्य गेत्त व्यदेशाभावात्प्रथिकानुसारी श

वा॰ त्रुताआक्रांतं स्वयमेतत्पुरं कदाचिच्चित्सोपेत्यर्थः॥ नानेति॥ प्रवाहपतितानात् मत मप्रघाह्ना नुसारेणप्राप्ताश्च॥ ॥ ॥

स्वमिति॥ स्वमेव स्वागतं कृत्वा स्वोचितं स्वागतादिसत्कारं कृत्वेत्यर्थः॥ समतामिति॥ देहधारणं विषादं दुःखहेतुं मध्यगं अनुभवहे
तुं कलयामास स तु कि मिति॥ श्लोकद्वयं वाक्यं आनंदं आनंदयति येन तं सुखहेतुं न ननंद तु नाभ्यनंदत॥ दुःखं दुःखहेतुं मध्यमं अनुभव

विविदुस्तं नृपं पौरा मंत्रिणश्च भगीरथं॥ त्याजयामासुरथं तं सविषादं स पर्यया॥ प्रभो राज्यं गृहाणेति प्रार्थितोप्यरिणा मुनिः॥
नाददे नाशहृताशेषं तृणमप्यशनाहते॥ कतिचिद्दिवसांस्तत्र नीत्वान्यत्र जगाम सः॥ भगीरथो यद्वा कष्टमिति लोकेन शोचित
॥ अथान्यत्रोपशांतात्मा परिविश्रांतधीः सुखी॥ आत्मारामः कदाचित्स संप्राप पितृपालितं पुरं॥ स्वमेव स्वागतं कृत्वा तेन सार्धं भगी
रथः॥ कंचित्कालमुवासासौ वने ग्रामे पुरे जने॥ समतामुपयातौ तौ गुरुशिष्यौ समौ स्थितौ॥ कलयामासतुः स्वस्थौ विनोदं दे
हधारणं॥ किमयं धार्यते देहः किं वानेनोज्झितेन नः॥ यथाक्रमं यथाचारं तिष्ठत्वेष यथास्थितं॥ इति निश्चित्य तिष्ठंतौ तौ वनाद्वनगा
मिनौ॥ न ननंदतुरानंदं न सुखं न च मध्यमं॥ धनानि वाजिविभवा ऐश्वर्यं वाष्टधोदितं॥ सिद्धेरप्यर्पितं तुष्टैर्मेनाते जर्जरं तृणं॥ अथै
कदा पुरश्रेष्ठे कस्मिंश्चिन्मंडलांतरे॥ अनपत्यं नृपं मृत्युरहरच्छ्येनवामिषं॥ तत्र प्रकृतयः खिन्ना नष्टदेशक्रमान्नृपं॥ अन्विष्यंति
स्म संयुक्तं गुणालक्ष्म्या विशालया॥ तं भगीरथमासाद्य स्थितं भिक्षाचरं भुनि॥ परिज्ञाय तं समानीय सैन्यैश्चक्रुर्महीपतिं॥ ॥ ॥

हेतुं॥ धनानीति॥ धनानि त्रसिद्धानि॥ वाजिविभवोश्वसंपत्तिः॥ तद्वदिव्यज्ञानामैश्वर्यं तद्वत्तदप्यष्टधोदितं अणिमादिकं तद्वत्सिद्धेरष्टमहासिद्धिभि
र्दिः देवयोनिभेदैस्तुष्टैः प्रीतैरर्पितमपि जर्जरं जीर्णं मेनाते अंतराय धीयेति भावः॥ ॥

नि·प्र६ इतीति।ततादृशंतद्वचःतासांप्रकृतीनांवचः।अथेति।पितामहाःसगरतनयाःतेषामुत्तरणार्थंनरकादुद्धरणार्थंभगीरथइतियशःप्रचारवी

५९

59

भगीरथःक्षणेनैवप्राप्तश्रीर्वंधुनासहः॥वलितस्तेनयात्रार्थंसमारोहन्मतंगजं॥भगीरथोजयतीतिजनारवैः॥नीरंध्रतामुपाजग्मु
गिरिद्वाराणिमहागुहाः॥तत्रतत्पालयन्तंतंराज्यंराजानमाहताः॥जग्मुःप्रकृतयःप्राप्ताःप्राङूरित्यंमृताधिपाः॥राजन्नस्माकमधिपोप
स्त्वयासपराकृतः॥मृत्युनाविनिगीर्णोमत्स्येनेवाम्भसिषंडुडः॥तत्त्वंपालयितुंराज्यंप्रसादंकर्तुमर्हसि॥अप्रार्थितोपपातानां॥
त्यागोर्थिनांचनोचितः॥ ॥वसिष्ठउवाच॥ ॥इतिसंप्रार्थितोराजातदंगीकृतवद्वचः॥सप्तसागरचिह्नायाःसवभूवभुवःपतिः।
समःशांतमनामौनीवीतरागोविमत्सरः॥प्राप्तकार्यैककरणरीतिरहितविस्मयः॥अथवर्षसहस्राणितपस्तप्त्वासुदारुणं॥
स्वपितामहोत्तारणेभुविगंगामयोजयत्॥भगीरथेमहीपतौयशःप्रचारवीथिका॥तदात्रिमार्गगाप्रसामहीतलेव्यवह एम ५८
॥ ॥इतिनिर्वाणप्रकरणेभगीरथोपाख्यानंनामषट्त्रिंशस्सर्गः॥ ॥

थिकाभगीरथस्यकीर्तिसंचारमार्गःतदादिमभरतआदिर्यस्मिन्कर्मणितद्यथाभवतितथेति॥महीतलमभवनक्रियाविशेषणं॥ ॥इति
श्रीवसिष्ठ·भगीरथो·नामषट्त्रिंशःसर्गः॥ ॥

पूर्वं दुर्लभापि चित्तविश्रांतिः स्वप्रयत्नेनैव लभ्यत इति दर्शयितुं भगीरथकथा कथिता॥ इदानीं तत्प्रतिबंधकपापसंचयं कृपया भावेद्दुर्लभम
पि स्वात्मज्ञानमाचार्यस्य प्रयत्नातिशयाल्लभ्यत इति दर्शयितुमनेकोपाख्यानगर्भं शिखिध्वजोपाख्यानमारभ्यते॥ इदमिति॥ पूर्वमिदंवि

वसिष्ठ उवाच॥ ॥ इदं पूर्वं परित्यज्य क्रोडीकृत्य मनः खगं॥ शांत आत्मनि तिष्ठ त्वं शिखिध्वज इवाचलः॥ ॥श्रीराम उवाच॥ ॥
कोऽसौ शिखिध्वजो नाम कथं चाचलतां गतः। एतन्मे कथय ब्रह्मन्नम्यो बोधविवृद्धये॥ ॥वसिष्ठ उवाच॥ ॥द्वापरे पूर्वमभवदती
ते सप्तमे मनौ मालवानां पुरे श्रीमान् शिखिध्वज इतीश्वरः॥ धैर्यौदार्यदयायुक्तः क्षमादमशमान्वितः॥ शूरः शुभसमाचारो मानी
गुणगणाकरः सुराष्ट्राधिपतेः कन्यां चूडालां नाम नामतः॥ उपयेमे सतीमात्मसदृशीं स शिखिध्वजः॥ अवर्द्धत तयोः प्रीतिरन्यो
